षलीगमनात्पूतो भवति॥ सुरापानात्पूतो भवति॥ पतितसंभाष
णात्पूतो भवति॥ अब्रह्मचारी सुब्रह्मचारी भवति॥ अधीतेनानेन क्र
तुशतेनेष्टिर्भवति॥ षष्ठी गायत्री शतसहस्रानभ्यस्याहयतेथसि
द्धिर्भवति॥ गायत्रीहृदयं ब्राह्मणः प्रयतः॥ शुचिः सर्वपापैः प्रमुच्य
ते॥ ब्रह्मलोके महीयते॥२१॥ इत्याह भगवान् गायत्रीहृदयं॥ श्री

८२ गायत्रीसावित्रीसरस्वतीप्रणमस्तु॥ अथकवचप्रारंभः॥ ॐ अस्य
श्रीगायत्रीकवचस्तोत्रमहामंत्रस्यब्रह्मविष्णुमहेश्वरऋषयः॥ गा
यत्र्युष्णिगनुष्टुप्छंदांसि॥ श्रीगायत्रीसावित्रीसरस्वतीदेवता॥ तद्बी
जं॥ भर्गःशक्तिः॥ धियःकीलकं॥ श्रीप्रसादसिध्यर्थेजपेविनियोगः
मूलेनषडंगंकुर्यात्॥ श्रीध्यानं॥ वर्णास्त्रांकुंडिकाहस्तांशुद्धनिर्मलज्यो
तिषीं सर्वतत्वमयीं वंदेगायत्रीवेदमातरं॥१॥ सप्तव्याहृतयःपातुस ८२
श्विराबिंदुसंयुता॥ संतुर्यसुधासंयुक्तासबलामांसदेवता॥२॥ गाय

वात्मापरमात्मायथाक्रमं॥ द्यौर्मूर्ध्निललाटेरुद्रभ्रुवोर्मेधाचक्षुषा॥१४॥ चं
द्रादिसोः कर्णयोश्चशुक्रबृहस्पतिनासिके॥ वायुर्देवस्तदंतौष्ठौउभयोः
संधिसाध्यतः॥१५॥ मुखमग्निर्जिह्वासरस्वती॥ ग्रीवांससंध्यानुबाहिस्त
नयोर्वसवः॥ बाह्वोर्मरुतः॥ हृदयंपर्जन्यं॥ आकाशमुदरं॥ नाभ्यंतरिक्षं
कटिरिंद्रियाणि॥ जंघेप्रजापत्यं॥ कैलासमलयांऊरूविश्वेदेवाजानु
भ्यां॥ जान्वोर्योसिजंघयोरपि॥ नेदयुंखुरपित्तपादौपृथिवीवनस्पत
योः॥ अंगुल्योर्लोमानिनखानिमुहूर्तास्ते॥ इतिग्रीवासुसंध्याकाल

पातुमूर्धानं च सकारकं ॥८॥ चक्षुषी मे विकारश्च श्रोत्रे रक्षतु तुकारकः
८३ नासापुटे वकारो मे रेकारस्तु कपोलकौ ॥९॥ णिकारस्त्वूर्ध्वमोष्ठं मे यका
रस्त्वधरोष्ठकं ॥ आस्यमध्ये भकारो मे गोकारश्चिबुकं तथा ॥१०॥ देका
रः कंठदेशं तु वकारः स्कंधयोरपि ॥ स्यकारो दक्षिणे हस्ते धीकारो वामह
स्तकं ॥११॥ मकारं हृदयं रक्षेत् हिकारो जठरं तथा ॥ धिकारो नाभिदे
शं तु योकारस्तु कटिं तथा ॥१२॥ गुह्यं रक्षतु योकारो ऊरू मे नः पदाक्ष ८३
रं ॥ प्रकारो जानुनी रक्षेत् चोकारो जंघदेशकं ॥१३॥ दकारो गुल्फदेशं तु

याकारः पादयुग्मकं ॥ इदं तु कवचं जाप्यं सर्वपापप्रनाशनं ॥१४॥
चतुःषष्टिकला विद्या विलासैश्वर्यसिद्धिदं ॥ जपारंभे तु हृदयं जपां
ते कवचं पठेत् ॥१५॥ मातृद्रोही पितृद्रोही समहापातकोपि च ॥ मु
च्यते सर्वपापेभ्यो ब्रह्मलोकं स गच्छति ॥१६॥ अमात्री चैव गायत्री क
वचं मनसा पठेत् ॥ न जलं पिबतो नित्यं पुरश्चर्णफलं लभेत् ॥१७॥
इ श्रीवसिष्ठसंहितायां श्रीगायत्रीकवचं संपूर्णमस्तु ॥ श्रीपूर्ण
मस्तु ॥ अथ पंजरप्रारंभः ॥ ॐ अस्य श्री गायत्रीपंजरस्तोत्रमं

८५ हामंत्रस्य ब्रह्माऋषिः॥ विकृतिछंदः॥ परमहंसोदेवता॥ ॐबीजं
ॐशक्तिः॥ ॐकीलकं श्रीप्रसादसिध्यर्थे जपे विनियोगः॥ मूलेन
हृत्स्थांगं न्यसेत्॥ अथध्यानं॥ हंसोगणेशो विधिरेव हंसो हंसो
हरिर्हंसमयश्च शंभुः॥ हंसोपि जीवो गुरुरेव हंसो हंसो हि मात्माप
रमात्म हंसः॥१॥ ॐभगवंतं देवदेवं ब्रह्माणं परमेष्ठिनं॥ विधातारं वि
श्वसृजं पद्मयोनिं प्रजापतिं॥२॥ शुद्धस्फटिकसंकाशं महेंद्रशि ८५
खरोपमं॥ बद्धपिंगजटाजूटं तडित्कनककुंडलं॥३॥ शरच्चं

त्रीपूर्वतः पातु सावित्री पातु दक्षिणे॥ ब्रह्मविद्या तु मे पश्चादुत्तरे मे
सरस्वती॥३॥ पावकीं मे दिशं रक्षेत्पावकज्वालरूपिणी॥ यातुधान
दिशं रक्षेद्यातुधानभयंकरी॥४॥ मारुतीं मे दिशं रक्षेन्मरुतश्चंडवाहि
नी॥ दिशं रौद्रीं ममावतु रुद्राणी रुद्ररूपिणी॥५॥ ऊर्ध्वं ब्रह्माणि मे रक्षे
त्सर्वांगे भुवनेश्वरी॥ तत्सदं पातु मे पादौ जंघे मे सवितुः पदं॥६॥ वरेण्यं
कटिदेशं तु भर्गो नाभिस्तथैव च॥ देवस्य मे तु हृदयं धीमहीति गलं
तथा॥७॥ धियो मे पातु जिह्वाग्रे यो पदं नेत्रगोलके॥ ललाटे नः पदं

श्रीपितामहोवाच ॥ शृणु नारद वक्ष्यामि ब्रह्ममूलं सनातनं ॥ ९ ॥
८५ रहस्यातिमन्मुखेक्षिप्तं देवदेवेति विछवे ॥ प्रपंचबीजमित्याहु
रुत्पत्तिस्थितिकारणं ॥ १० ॥ पुरा मया च कथितं कश्यपाय च
धीमते ॥ गायत्रीपंजरं नाम्ना रक्ष्यं भुवनत्रयं ॥ ११ ॥ ऋष्या
दिकं च छंदश्च वर्णसांगावरणकं क्रमात् ॥ वाहनायामंत्रास्त्रान्मू
र्तिध्यानसमन्वितं ॥ १२ ॥ स्तोत्रं च तानहं प्रवक्ष्यामि अपि स्नेहा ८५
च्च नारद ॥ आचम्य नियतः पश्चाद्वाम ध्यानपुरःसरं ॥ १३ ॥

ॐ आहौ विचिंत्याथ व्योममहोमान्यसंस्थितां ॥ धर्मकंदगतां ज्ञानां ऐ
श्वर्याष्टदलान्वितां ॥ १४ ॥ वैराग्यकर्णिकासीनां ॐकारग्रहमध्यमां ॥
ब्रह्मवेदसमायुक्तां चैतन्यपुरमध्यगां ॥ १५ ॥ तत्त्वहंसपहाकीर्णां श्र
ब्दपीठासनस्थितां ॥ निर्विकल्पनरोमूलेन तन्त्रसिंहासने स्थितां ॥ १६
नादबिंदुकलातीतां गोपुरे रूपशोभितां ॥ विद्यामविद्यामत्तत्त्वावादे प्र
कारैरावृतसंयुते ॥ १७ ॥ निर्गलार्गलसंछिन्नां निष्कलाद्वारवाटिकां ॥
चतुर्वर्गफलोपेतां नित्यकर्मविनिर्दतां ॥ १८ ॥ सांद्रानंदसुधासिंधूत्तं

गमिठीपमध्यगां॥ ध्यानधारणयोगादिलक्षणगृहस्थलतावृतां॥१९॥ सह
८६ सच्चित्स्वरूपाख्यां मृगपक्षिसमाकुलां॥ गविकारसमाश्लिष्टांनिज
मध्यागणान्वृतान्॥२०॥ पंचकारणपंचोसौनद्वैतंनिष्कलान्वितं॥ वेदोप
निषदाख्यार्थदेवर्षिगणसंवृतां॥२१॥ इतिहासगृहगणैसदारैरभिवं
दितां॥ षडंगसिद्धगंधर्वैस्तूयमानामनिंदितां॥२२॥ गंधर्वाप्सरयक्षैश्च
संवृतांगमकिंनरैः॥ नृत्तगानविनोदादिकथालापनतत्परां॥२३॥ तदि ८६
ख्यावामनोगम्यांसविलुः स्रष्टिकारिणी॥ वरेण्यमिष्टमन्मस्तेमन्मस्ते

ग्रत्तस्वनंस्फुरद्दिंदीवरेक्षणं॥ हिरण्मयंविरूपाक्षमुपवीताजिना
वृतं॥४॥ मौक्तिकाक्षस्रजवकपुस्तकौलयसमन्वितः॥ कर्पूरोद्धूलि
ततनुः स्रष्टिर्नयनवर्द्धनः॥५॥ विनयेनोपसंगम्यशिरसाप्रणि
पत्य च॥ नारदः परिपप्रच्छदेवर्षिगणमध्यगं॥६॥ भगवन्देव
देवेशसर्वसंस्करणानिधे॥ श्रोतुमिच्छामियत्नेनभोगमोक्षैकसा
धनं॥७॥ ऐश्वर्यादिसमग्रत्वंद्वंद्वभावविवर्जितं॥ यदेकंनिखिलं
सूक्ष्मंनिरंजनमनामयं॥८॥ एतत्प्रियतरंलोकेतन्मेब्रूहिपितामह॥

८ कुटिलभ्रुकुटीं वीर्यविष्णुशिवासनां ।। गुरुभार्गवकर्णीं तां सोम
सूर्याग्निलोचनां ।। २० ।। इडापिंगलसूक्ष्माख्यावायुनासापुटा
न्वितां ।। संध्याद्विजपुटीतालसद[illegible]बिंबकां ।। २१ ।। संध्या
सुसुमणिं कंठमरुद्धाकुसमन्विता ।। पर्जन्यहृदयासक्तवसुसु
स्तनमंडला ।। २२ ।। आकाशोदरविश्रस्तनाभ्यवांतरदेशिका ।। ८
प्राजापत्याख्यजघनां कट्याखिंकिणिसंयुता ।। २३ ।। ऊरुकूल
समलयशोभमानासुरद्विषां ।। जानुनी जह्नुकुशिकं वैश्वदे

वसमाकुयं ।। २४ ।। अयनद्वयजंघाद्यापित्र्याख्यास्खुरसंयुता ।। भूः
पदं चलताद्वक्षगुल्मरोमसमन्वितां ।। २५ ।। केतुमासाश्च कृत
वो निमिषा सवत्सरां ।। अहोरात्राद्धमासांश्च[illegible]कः
[illegible]सरां ।। २६ ।। मायाकल्पितवैचित्र्यं संध्याच्छादनसंयुता ।। ज्वल
त्कालानलप्रख्यां तडित्कोटिसमप्रभां ।। २७ ।। कोटिसूर्यप्रतीका
शांशशिकोटिसुशीतलां ।। सुधामंडलमध्यस्थां सांद्रानंदामृ
तात्मिकां ।। २८ ।। सहस्रपरमां देवीं रागमध्यांदनप्रदां ।। सह

४४ स्तनेत्रीं गायत्रीं देवीं शरणमहं प्रपद्ये ॥९॥ ध्यात्वात्मानविबोधेन
ब्रह्मपंजरमारभेत ॥ पंजरस्य ऋषिः सोहं छंदो विकृतिरुच्यते
॥१०॥ देवता च परोहंसो परब्रह्मादिदैवतं ॥ ब्रह्मणो बीजं क्लीं
स्याघोकीलस्य मुद्राहतं ॥११॥ नत्रेतंथी ॥ मक्रिक्षेत्रंथियोस्थाय स्व
रूपदं ॥ मंत्रमान्योतिरिर्यो निर्रूष्टः सवेदकं ॥१२॥ विनियोगश्च
सिध्यर्थं पुरुषार्थचतुष्टये ॥ षड्देरंगं षडंगं च तैरेव व्यापकत्र ४४
यं ॥१३॥ पूर्वोक्तदेवतां ध्याये साकारगुरुसंयुतां ॥ पंचवक्त्रांद

शोम्स्ता त्रिमिक्तां ॥२४॥ देवदेवस्य हंसस्त्वं थीमस्य दैवतरूपिणी ॥ धीयो यो नः
प्रेरयति तद् ब्रह्म समुपास्महे ॥२५॥ परोसौ सविता साक्षाद्देनो निहर
णाय च ॥ ओमित्येकाक्षरमयी मतिब्रह्मसनातनं ॥२६॥ आपो ज्योति
रितिद्वाभ्यां पंचभूतात्मकसंस्थितं ॥ रसो मृतं ब्रह्मपदैस्तानि त्याख्याप
नीं परां ॥२७॥ भूर्भुवस्वः परे त्यं तैनिगम्यत्वत्प्रकाशिकां ॥ महर्जन
स्तपसत्यं पदैर्लोकैर्वरक्षितां ॥२८॥ सहस्रोस्त्वविराट्रूपं रहस्यं ने
यदाम्यहं ॥ व्योमकेशालंकसघोकिरीटविराजितां ॥२९॥ मेघयभु

रुद्धं ध्यां सरस्वतीं ॥४९॥ एवं ध्यात्वा ततः सम्यक् पंजरं सुसमारभेत् ।
८९ त्रिपदा ऋग्मया पूर्वां मुखी ब्रह्मास्त्रसंज्ञिकां ॥५०॥ चतुर्विंशति तत्वाख्या
पातु प्राचीं दिशं मम ॥ चतुष्पदा यजुर्ब्रह्मा दंडाख्या दक्षिणा परा ॥५१
षड्विंशत्तत्वयुक्ता सा पातु मे दक्षिणे दिशं ॥ प्रत्यङ्मुखी पंचतत्वं पंचा
शत्तत्वरूपिणी ॥५२॥ पातु प्रतीचरामतं सा ब्रह्मस्त्रिरोमिकां ॥
सौम्या ब्रह्मतुरीयाख्या साथर्वांगिरसप्रिया ॥५३॥ उदीचीं षड्दृशा ८९
पातु चतुःषष्टिकलात्मिकां ॥ पंचषट्पदरहितानव पादैस्तनाक्ष

रं ॥५४॥ व्योमस्या सा तु मे चोर्ध्वां दिशं विंहांगसंस्थितां ॥ विद्युन्निभा
ब्रह्मसंध्या मृगारूढा चतुर्भुजा ॥५५॥ चापथर्माचासिधरा पातु मे
पावकीं दिशं ॥ ब्राह्मी कुमारी गायत्री रक्तांगी हंसवाहिनी ॥५६॥
बिभ्रत्कमलाक्षस्रुक्स्रुवौ पातु नैरृतिं ॥ सावित्री युवती रौद्री च
शुक्लांगी वृषभवाहिनी ॥५७॥ शूलां लयकपालाक्षस्रग्वर्णा पातु
वायवीं ॥ श्यामा सरस्वती वृद्धा वैष्णवी गरुडासना ॥५८॥ सुख
र्गाज्ञानयक्रा पातु रौवीं दिशं मम ॥ स्वस्वरस्ता स्थिता पातु म

१० हरात्यांगदेवता ॥५९॥ यंत्राधिदेवता यंत्रामुद्राधिष्ठितदेवता ॥ व्या
पकत्वेनयस्मात्सर्वदाप्यद्वलमस्तके ॥६०॥ तत्सवंमेशिरःपातुभालं
मेसवितुःपदं ॥ वरेण्यंदृशामेपातुश्रुतिभर्गःसदाममा ॥६१॥ देवस्य
मेपातुघ्राणंधीमहीतिचमेमुखे ॥ धियोमेरसनांपातुकंठंमेपातुनः
पदं ॥६२॥ प्रकर्षेणचमेस्कंधौभुजौपातुप्रचोदयात् ॥ परःपदंपातु
करौवक्षोमेरजसेपदं ॥६३॥ असौमेहृदयंपातुमध्यमेपात्वथःप १०
दं ॥ मनोनाभिंसदापातुसदापातुकटिंमम ॥६४॥ मायायाःसक्थि

शंभुजांत्रिपंचास्तुनमोज्वला ॥४४॥ मुक्ताविद्रुमसौवर्णसितनी
लनिभाननां ॥ वाणीपरारमामायाचानंदवदनैर्युतां ॥४५॥ षडंग
देवतारूपमंत्रात्यवयबालिकां ॥ अर्धेंदुबिंबमुकुटांकिरीटमणि
कुंडलां ॥४६॥ अंगुलीयादिकर्कूरकटकाद्यैरलंकृतां ॥ दिव्यस्रग्
वस्त्रसंछिन्नांरविमंडलमध्यगां ॥४७॥ वरांनमाज्ययुगुलांशं
खचक्रगदाधरां ॥ शुभ्रंकपालंसगुणंवहंतिमक्षमालिकां ॥४८
गायत्रीवरदांदेवीसावित्रीवेदमातरं ॥ विचित्रमंत्रजननीस्म

सखा तु मे सुतानू ॥ ७० ॥ व्योमसस्या तु मे बंधून् भ्रातॄन्नाम्नांश्च पातु मे ॥ पशूश्च मे
११ पातु गो जाश्च क्रतवः पातु मे भुवः ॥ ७१ ॥ सर्वमिंद्रियजा पातु मान्यं मे पातु नः
सदा ॥ अनुक्तमपि यत्स्थानं शरीरे तर्बहिश्च मे ॥ ७२ ॥ तत्सर्वं पातु मे नित्यं हं
सोहं सोहं महानिद्रा ॥ इदं ते कथितं सर्वं अस्माभिर्ब्रह्मपंजरं ॥ ७३ ॥ धारये
द्विजवर्यो यः श्रावयेद्वा पठेद्यपि ॥ स विष्णुः स शिवः सोहं सोक्षरः परमस्व
राट् ॥ ७४ ॥ शताक्षरमयीं देवीं नाम्नाष्टकं शतं मुने ॥ तदेतत्सरमं गुह्यं शृणु ११
वक्ष्यामि हे वयं ॥ ७५ ॥ भूतिदा नवनां वाणी वसुधा सुमनामही ॥ हरणी जनमर

हिताससक्विवर्गा लपस्विनी ॥ ७६ ॥ पयस्विनी सती सा रागा वैदेवीं तन्मयी समा
॥ विश्वतुर्या वरो हसा रोघिणी यामिनी भवा ॥ ७७ ॥ गायविद्या वरिष्ठा च स्यं
दनी धीमती हिमा ॥ धीषणी योगिनी योनी नदी प्रस्थानवोदिनी ॥ ७८ ॥ दामिनी
यामिनी पद्मा रोहिणी रमणी नटी ॥ सनामुखी सामगी यकुला नांदो पवर्जिता
॥ ७९ ॥ मायाप्रासा लतरां दोग्ध्री मानिनी पोषिणी क्रिया ॥ ज्योत्स्नातीर्थमयी रमा
सोमभूःस्युं जया नटी ॥ ८० ॥ ब्राह्मी हैमी तु तुर्वश्या शिवानी सुंदरी वनी ॥ ॐ
कारी हंसिनी सत्या शुद्धा चिसद्गुणा वती ॥ ८१ ॥ वंध्यासुता रमा तन्वी पुत्रिका

कर्णिकासखी॥ हेम्नी नारा वेगवती दितिजघ्नी षडानना॥८२॥ अमरा
तीर्थदात्री च दुर्धर्षा रोगहारिणी॥ सर्वासरित्स्वरूपांसघ्नीषद्वसावजि
नीरणी॥८३॥ संवृता हतदंतस्था सलिला विमलाव्यया॥ योधिनी
दमना सर्वा अमला बलदा जया॥८४॥ गौतमी जान्हवी रज्ञातारिणी
जातवेदसा॥ अजरा दृष्टिदा जाया आत्मिका नामकारिणी॥८५॥
गुह्यामेतानि नामानि देवीमंत्रात्मकं ऋषे॥ जप्तव्यामधनाश्श्रे देवि
केन द्विजन्मना॥८६॥ मर्त्यानाममृतत्वाय तीर्थानाममयी तथा॥

नीपातु शुद्धं ज्योतिःपरं चमे॥ रसः पातूरुयुग्मं च जानुनी त्वमतं मम॥६५
जंघे ब्रह्म परं पातु गुल्फौ पातु च मे पदं॥ पादौ भुवः स्वदा पातु सर्वाण्यंगो
निमेषु च॥६६॥ रोमाणि मे महान्स्फोमरूपानि मे जनाः॥ उष्णानि दृश्य
पातु श्वतर्द्देशसा पातु मे तपः॥६७॥ सत्यं पातु समायोषिहंसो बुद्धिं च
पातु मे॥ शुचिषन्मे शुक्रपक्षो वसुपातु श्रियं मम॥६८॥ गतिं पात्वंतरिक्षं
च होणीदानं च पातु मे॥ दिविषत्पातु मे विद्यां अतिथिः पातु मे गृहं॥६९॥
धनं दारोण्टसत्पातु नृपत्यं च पातु मे॥ वरं सत्पातु मं ज्यायांक्रतु

छुभक्तानांवैष्णवीसर्वांतरात्मनि॥निस्पृहाणांनृणांमुक्तिःशाश्व
१३ तीभवतीध्रुवं॥१२॥जप्यंत्रिवर्गसिध्यर्थंमोक्षायपरमायच॥उ
घंतंचंद्रकिरणामुपस्थायकृतांजलिः॥१३॥तुलसीकर्णयोस्ति
ष्ठन्नासिकोवाजपेदिदं॥सर्वान्सकामावाप्नोतितथैवशिवसन्नि
धौ॥१४॥ममप्रीतिकरंदिव्यंशिवभक्तिविवर्द्धनं॥ज्वरार्त्तानांकु
शाग्रेणमार्जनंकुष्टिनंतथा॥१५॥अंगमंगयथोक्तांगःपंजरेण १३
तुसाधकैः॥मंडलेनविशुद्धेनसर्वरोगविनाशनं॥१६॥मत्तप्रना

नांनारीणांसर्वांगानिप्रमार्जयेत्॥सुपुत्रंलभतेनारीपत्नीकामंव
रांगणा॥१७॥अश्वत्थेरावतीसेवाविल्वमूलेस्वरूपमा॥फलमू
लार्थंचंडीकांसमुमुक्षुर्यत्रकुत्रचित्॥१८॥जपारंभेतुहृदयंजपां
तेपंजरंपठेत्॥यंयंचिंतयतेकामंतंतंप्राप्नोतिनिश्चितं॥१९॥
श्रीब्रह्मतांत्रिकेब्रह्मनारदसंवादेगायत्रीपंजरस्तोत्रंसंपूर्ण
मस्तु॥श्रीगायत्रीदेव्यैर्पणमस्तु॥जलंगृह्यातीतिजप्यनिवेद
येत्॥अथस्तवराजपारंभः॥ॐअस्यश्रीगायत्रीस्तवराज

१४ स्तोत्रमहामंत्रस्यब्रह्मनस्त्रष्टिकृताविश्वामित्रऋषिः गायत्रीछंदः॥ना
नाछंदांसि॥सकलजननीचतुष्पदागायत्री॥परमात्मादेवता॥प्रथ
मपादबीजं॥ॐ तत्सवितुर्वरेण्यं॥सर्वोत्कृष्टपरंधामभर्गोदेवस्य
धीमहि॥द्वितीयपादश्शक्तिः॥सर्वोत्कृष्टधियोयोनःप्रचोदयात्॥
तृतीयपादःकीलकं॥श्रीप्रीत्यर्थेजपेविनियोगः॥अथध्यानं॥ॐ
गायत्रीवेदगायत्रीसंततमखिलफलदावेदशास्त्रैकविद्याविद्याब्रह्मवि १४
द्यापरमशिवपदंश्रीपदंचेत्करोति॥सर्वोत्कृष्टपरंतत्सवितुरनु

मोक्षायचमुमुक्षूणांश्रीकामंश्रीसदागृहे॥८७॥सदाविजयाज्ञ
पस्थानंव्याधीनानामरोगकृत्॥वंध्यायवंध्यकमिदंविद्याये
वेककामदं॥८८॥दरिद्राणीधनाढ्योपिपापीनांपापशांतये॥
वादकानांवाद्यविद्याकवीनांकवितापदं॥८९॥अन्नायक्षुधिता
नांस्वर्गीयस्वर्गमिच्छतां॥पशुभ्यःपशुकामानांपुत्रेक्षंपु
त्रकांक्षिणां॥९०॥पंचमहापापनाशंचबन्धूणांशत्रुक्षयायच॥
राज्यवश्यायजप्तव्यंपंजरंराज्यसेवितं॥९१॥भक्तयथवि

मनुमहार्णवेस्ववेद्यांतस्सूक्ष्मांनित्यंस्मरत्वानुसारंनियमितचरितंमूलमं
१५ त्रंनमोंत॥४॥अस्त्रंराद्यहृतंअघोरसहितंरुंडेनवाजोहृतं॥आदि
त्यादिहृतंशिरोंतस्सहितंपापक्षयार्थंपरं॥तुर्यांसोहिविलोममंत्रप
ठणंदीजंशिखांतोर्थकं॥नित्यंकालनियम्यविप्रविदुषांक्लिंदुष्टतां
भूसुरान्॥५॥नित्यंमुक्तिपदेनियम्यपवनंनिर्दोषसप्तत्रयींसम्यक्
ज्ञानगुरोपदेशविधिवद्देवींशिखांतामयीं॥षष्ठ्यैकोणसुसंख्यया १५
मनुगतःसोषुम्नमार्गत्रयींध्यायेन्नित्यसमस्तवेदजननींगायत्रिसं

ध्यामयीं॥७॥गायत्रींसकलागमार्थफलदांसौरम्यजीवेरींब्रह्मादि
त्रयसंपुटाईकरणींसंसारपारायणीं॥संध्यासर्वसमानतंत्रपदया
ब्रह्मानुसंध्यायनींएकद्वित्रिचतुःसमानजंपपावर्णाष्टकंपाद
योपाद्यंतेप्रणवादिमंत्रपठनेमात्रत्रयीसंपुटीं॥८॥संध्याद्वित्रि
पदंयजेस्मरतरंसायुंतुरीयांहिनित्यानित्यमनंतकोटिपुण्यफलदं
प्राप्तंनमस्कुर्महे॥ओजोसिसमिमहोसिबलमसिभ्राजोसितेजस्विवर्च
स्विसवितानिसोमममृतंरूपंपरंधामसि॥९॥देवानांद्विजवर्यतांमुनि

गणांमुक्तार्थिनांशांतिनी॥ इत्येवमेतच्चयःपठंतियमनोयंयंस्मरेत्तत्तमाप्नुयात्
१६ ॥१०॥ ॐमित्येकमजस्वरूपपरमंतत्त्वस्यथानाजीतंनारंतत्रसमन्वितं
परत्परेपरात्रयंगर्भितं॥ आपोज्योतिरसोमृतंजनमहःसत्यंतपःस्व
र्भुवंभूयोभूयनमामिभूर्भुवस्वरोमित्येतत्तन्मंत्रकं॥११॥ ओंह्रींबिंदुस
मुच्चरत्परतरेबालात्रिवर्णोच्चरन्व्याहृत्यादिसबिंदुयुक्तत्रिपदांतारं
त्रयंतुर्यगां॥ आरोहाद्यवरोहणक्रमगतःश्रीकुंडलीसंस्थिरन्देवीमा १६
नसपंकजेत्रिनयनेपंचाननेपातुमां॥१२॥ सर्वेसर्ववसेसमस्तसमये

यस्तेवरेण्यंभर्गोदेवस्यधीमहीभिर्धातिधियोयोनःसूर्यवतेजः
॥१॥ साम्राज्यबीजंप्रणवत्रिपादंसव्यापसव्यंत्रिपदेसहस्रं॥ सं
पूर्णसोमप्रभवंहिभूतिस्तथाभवेद्वाक्यविचित्रवाणी॥२॥ शुभांशि
वंशोभनमस्तुमह्यंसौभाग्यभोत्सवमस्तुनित्यं॥ प्रकाशविद्याप्रि
यशास्त्रसर्वेभजेन्महामंत्रफलंभवंति॥३॥ इतिध्यानं॥ ॐ ब्रह्मा
स्त्रंब्रह्मदंडंशिरसिशिखमहान्ब्रह्मरंध्रीषंनमोनंतसूक्तंपारायणो
क्तंप्रणवपरममहान्वाक्यसिद्धांतमूलं॥ सूर्यंत्रीणिद्वितीयंप्रथम

८ तीयपरमंसंयोगसव्याहृतंश्रीसवित्रायमनोन्मनसिजंध्या
यामिदेवीपरं॥१५॥ओंहोगायत्रिमंत्रंगुरुकृतनियमंधर्मधर्मानु
कूलंसर्वाघंसारभूतंसकलमनुमयंदेवतानागम्यं॥देवानांपूर्व
देवाद्विजकुलसुनयःसिद्धविद्याधराद्यैःकोवक्तुंकःसमर्थःस्तव
महिममहान्बीजराजादिमूलं॥१६॥गायत्रींत्रिपदांत्रिबीजस
हितांत्रिव्याहृतित्र्यैःपदांत्रिब्रह्मत्रिगुणांत्रिकालनियमांवह्नित्रयां ८
त्रेषरां॥सांख्यांत्रिनयरूपिणींत्रिनयनांमात्रात्रयींतस्वरांत्रैलो

क्यत्रिदशांत्रिकोटिसहितांसंध्यांत्रयीतांनमः॥१७॥ओमित्येकत्रि
मात्राभुवनकरणंदिस्वरंवह्निबीजंत्रीणित्रिणिद्विपादंत्रिगुणगुण
मयंत्रैपरांतांत्रिसूक्ष्मं॥तत्त्वावांपूर्वशक्तित्रितयगुरुपदंपीठत्रयंतां
त्रिकंतस्मादेतत्त्रिपदत्रिविधमनुसरंत्राहिमांमोंनमस्ते॥१८॥स्वस्ति
श्रद्धानिमेधामधुमधुरस्वंसंशयःधारकांतिर्विद्याबुद्धिर्बलंश्रीरतु
लधनमतिःसौम्यवाक्यानुवर्तीन्॥मेधाप्रज्ञाप्रतिष्ठाम्रदुमधुरगि
रापूर्णविद्याप्रपूर्णाप्राप्ताप्रत्यूषचिंत्याप्रणवस्वराणिनांनिस्क

१८ र्मं॥१९॥पंचाशद्वर्णमध्येप्रणपरयुतेमंत्रमाद्यंनमोंतेसर्वेसव्यापकस्यं
शांतगुणमभितोवर्णमष्टोत्तरांते॥एवंनित्यंजपंतेत्रिभुवनसहितंसूर्यमं
स्यंत्रिपारंशांतंविज्ञानगम्यंगगनसदृशपदंध्यायतेयःसमुक्तः॥२०॥जा
दिक्षांदिसबिंदुयुक्तसहितंमेरुक्षकारांतकंव्यस्ताव्यस्तसमस्तवर्गस
हितंपूर्णशताष्टोत्तरं॥गायत्रीजपतांत्रिकालसहितंनित्यंनैमित्ति
कं॥एवंजाप्यफलंशिवेनकथितंसद्भोगमोक्षप्रदं॥२१॥सप्ताव्याहृ १८
तिसप्ततानिविकृतिःसत्यंवरेण्यंध्रुतिःसर्वंतत्सवितुश्चधीमहिमहा

सत्याभिधेसात्विकेसावित्रीसविताशात्रीपवनगेसांख्यायनेगोत्रजे॥
सावित्र्युपकल्पसंग्रहविधिःसंध्याभिधानात्मकेगायत्रीप्रणवादि
मंत्रगुरुणासंप्रातस्मैनमः॥१३॥क्षेमंदिव्यमनोरथंपरतरंचेतःसमा
धीमहीज्ञानंनित्यवरेण्यदेवयजनंदेवस्वभर्गोधियः॥मोक्षार्थीवि
जयार्थिनोसवितुचश्रेष्ठंविधिस्तत्सहंप्रज्ञामेधाप्रचोदयात्मतिस्त्रिने
यन्नःपदःपातुमां॥१४॥सत्यंतत्सवितुर्वरेण्यविरलंविश्वादिमाया
त्मिकंसर्वाधंप्रतिपाद्ययुक्तरमयातारंतथामन्मथं॥तुर्यातंत्रितयंहि

तीनांत्वांसर्वसंकुरुष्वमेतिममतानाहंत्वयासेयत्नी॥२४॥सौम्यंसौभा
११ ग्यहेतुःसकलसुखकरंसर्वसौख्यंसमस्तंससंसद्भोगनित्यंसुखज
नसुहृद्दंसुंदरंश्रीसमस्तं॥सौमांगल्यंसमग्रंसकलशुभकरंस्वस्तिवा
चंसमस्तंसंवेद्यंसद्विवेकंत्रिपदयुगंप्रातमध्यान्हमस्तं॥२५॥गाय
त्रीपदपंचप्रणवद्दंहंत्रिधासंपुटंसद्व्याहृतिक्रममंत्रसारार्यदत्वाकंदेवी
पदंभूत्रयं॥मंत्रादिस्थितकेषुसंपुटमिदंश्रीमातृकावेष्टनंवर्णानांहि ११
विलोममंत्रभजनंसंसारसंमोहनं॥२६॥भूराद्यंभूर्भुवस्वस्त्रिपदप्र

युतंअक्षराद्यंतयोज्यंस्वद्दृष्टिस्थितालकार्यंक्रमशिखसकलंसर्वमंत्र
प्रशस्तं॥तत्सर्वांगंमातृकाणांमननमयवपुर्मंत्रयोगंप्रयुक्तंसंहारं
क्षादिवर्णवसुत्रातगणनंमंत्रराजंभजामि॥२७॥विश्वामित्रमुखोक्तं
हितकरंसर्वार्थसिद्धिप्रदंस्तोत्राणांपरमंप्रभातसमयेपारायणं
नित्यशः॥देवानांविधिवादमंत्रसकलंसिद्धिप्रदांसंपदांसंप्राप्नोति
परत्रसुखदंआयुष्यमारोग्यतां॥२८॥श्रीविश्वामित्रकृतगायत्री
स्तवराजस्तोत्रसंपूर्णमस्तु॥श्रीगायत्रीदेवीर्पणमस्तु॥श्रीसांब

श्रीगायत्रीप्रसादसिध्यर्थे वेदोक्तसूक्तपारायणे विनियोगः ॥ हरि
१०० हि ॐ ॥ बलिष्ठात्तद्वपुषे धायि दर्शतं देवस्य भर्गः सहसो यतो जनि ॥
यदीमुपह्वरते साधते मतिर्ऋतस्य धेना अनयंत सस्रुतः ॥ पृक्षो व
पुः पितुमान्नित्य आशये द्वितीयमा सप्तशिवासु मातृषु ॥ तृतीयम
स्य वृषभस्य दोहसे दशप्रमतिं जनयंत योषणः ॥ निर्यदीं बुध्नान्महि
षस्य वर्पस ईशानासः शवसा क्रंत सूरयः ॥ यदीमनु प्रदिवो मध्व आ १००
धवे गुहा संतं मातरिश्वा मथायति ॥ प्रयत्पितुः परमान्नीयते पर्या पृ

नभर्गस्य देवं भजे ॥ धाम्नो धाम्नधर्मादिधारणमहान्धीमित्यनं ध्याय
ते ॐ तत्सर्वमनुप्रपूर्वविदाकं पातु त्रयं केवलं ॥ २२ ॥ विद्यानां विषसादि
वेदवचसः प्रज्ञानसंधारणं श्रद्धामेधायशः श्रीवसुमनसः स्वस्तिं
श्रियं तां सदा ॥ आयुष्ये धनधान्यलक्ष्मीमतुलं देवी कटाक्षं परं त
त्कालेसकलार्थसाधनमहान्मुक्तिर्महत्संपदं ॥ २३ ॥ पृथ्वीगंधार्चना
नां नभसि कुसुमैर्वायुधूपप्रकाशाद्वह्नेर्दीपप्रकाशात् जलमयमनत
यं नित्यसंकल्पपूजा ॥ एतत्सर्वं निवेद्य सुखवसति हृदि सर्वदा संप

वेदितव्ये ॥ इत्यथर्वणी श्रुतिः ॥ अहं पंचभूतानि ॥ महापंचत
१००१ न्मात्राणि ॥ अहमखिलं जगत् ॥ वेदोऽहमवेदोऽहं ॥ विद्याहमवि
द्याहं ॥ अजाहमनजाहं ॥ अधश्चोर्ध्वं च तिर्यक्चाहं ॥ अहं रुद्रे
भिर्वसुभिश्चरामि ॥ अहमादित्यैरुत विश्वदेवैः ॥ अहं मित्रावरु
णावुभौ बिभर्मि ॥ अहमिंद्राग्नी अहमश्विनावुभौ ॥ अहं सोमं
त्वष्टारं ॥ उत पूषणं भगं दधामि ॥ अहं विष्णुमुरुक्रमं ॥ ब्रह्माण
मुत प्रजापतिं दधामि ॥ १ ॥ अहं दधामि द्रविणं हविष्मते ॥ सु १००२

१

प्राव्ये यजमानाय सुन्वते ॥ अहं राष्ट्री संगमनी वसूनां ॥ चिकि
तुषी प्रथमा यज्ञियानां ॥ अहं सुवे पितरमस्य मूर्धन् ॥ मम यो
निरप्स्वंतः समुद्रे ॥ य एवं वेद ॥ २ ॥ स दैवीं संपदमाप्नोति ॥
ते देवा अब्रुवन् ॥ नमो देव्यै० ॥ १ ॥ श्लोकं पठेत् ॥ ॐ तामग्निवर्णां
तपसा ज्वलंतीं वैरोचनीं कर्मफलेषु जुष्टां ॥ दुर्गां देवीं शरणमहं प्र
पद्ये महेसुतरां नाशयते नमः ॥ देवीं वाचमजनयंत देवास्तां वि
श्वरूपाः पशवो वदंति ॥ सा नो मंद्रेषमूर्जं दुधाना धेनुर्वागस्मा सुष्टु
हा नुप

तेतु॥कालरात्रींब्रह्मस्थितांवैष्णवींस्कंदमातरां॥सरस्वतीमदितिंदक्ष
१०२ दुहितरांनमामिपवनांशिवां॥३॥महालक्ष्मीचविमहेसर्वशक्त्यैधीम
हि॥तन्नोदेवीप्रचोदयात्॥अदितिर्ह्यजनिष्ट॥दक्षयादुहितातव॥तांदेवा
अन्वजायंत॥भद्राअमृतबंधवः॥कामोयोनिःकमलावज्रपाणिर्गुहा
हसामातरिश्वाभ्रमिंद्रः॥पुनर्गुहासकलामाययाचपृथक्केगांविश्वमा
तादिविद्योम्॥२॥एषाआत्मशक्तिः॥एषाविश्वमोहिनी॥पाशांकुशध
नुर्बाणधरा॥एषाश्रीमहाविद्या॥यएवंवेद॥सशोकंतरति॥नमस्ते १०२

सुधोवीरुधोदेसुरोहंति॥उभायदस्यजनुषंयजिन्वतआदित्यवि
श्वोजभवद्घृणाशुचिः॥आदित्यमातरंविराधास्वाशुचिरहिंस्यमा
नउर्विंयाविवाहथे॥अनुपूर्वाअरहंसनाजुवोनिनव्यासीध्ववरासु
धावते॥१॥अथश्रीदेव्युपनिषत्प्रारंभः॥ॐसर्वेवैदेवादेवीमु
पतस्थुः॥कासित्वंमहादेविसाब्रवीत्॥अहंब्रह्मस्वरूपिणी॥१॥
अतःप्रकृतिपुरुषात्मकंजगत्॥शून्यंचाशून्यंच॥अहमानं
दानंदौ॥अहंविज्ञानाविज्ञाने॥अहंब्रह्माब्रह्माणी॥द्वेब्रह्मणी

तिहोत्रसमन्वितं ॥ अर्धेंदुलसितं देव्याबीजं सर्वार्थसाधकं ॥ एव
१०३ मेकाक्षरं मंत्रं यतयः शुद्धचेतसः ॥ ध्यायंति परमानंदमया ज्ञानं
बुराशयः ॥ वाङ्माया ब्रह्मसूस्तस्मात्षष्ठं वक्त्रसमन्वितं ॥ सूर्योवा
मश्रोत्रबिंदुः संयुक्तष्टात्तृतीयकः ॥ नारायणेन संयुक्तो वायु
श्चाधरसयुतः ॥ विच्चे नवार्णकोर्णः स्यान्महदानंदनायकः ॥ ६
हृत्पुंडरीकमध्यस्थां प्रातःसूर्यसमप्रभां ॥ पाशांकुशधरां सौ १०३
म्यां वरदाभयहस्तकां ॥ त्रिनेत्रां रक्तवसनां भक्तकामदुघां भ

जे ॥ नमामि त्वां महादेवीं महाभयविनाशिनी ॥ महादारिद्र्यशम
नी महाकारुण्यरूपिणी ॥ ७ ॥ यस्याः स्वरूपं ब्रह्मादयो न जानंति
तस्मादुच्यते अज्ञेया ॥ यस्या अंतो न विज्ञायते तिर्यगूर्ध्वमध
स्तस्मादुच्यते अनंता ॥ यस्या विग्रहं नोपलभ्यते तस्मादुच्यते
अलक्ष्या ॥ यस्या जननं नोपलभ्यते तस्मादुच्यते अजा ॥ एकै
व सर्वत्र वर्तते तस्मादुच्यते एका ॥ एकैव विश्वरूपिणी ॥ तस्मा
दुच्यते अनेका ॥ अत एवोच्यते अज्ञेयानंतालक्ष्याजैकानेका

॥८॥मंत्राणांमातृकादेवीशब्दानांज्ञानरूपिणी॥ज्ञानानांचिन्मयातीता
१०४ शून्यानांशून्यसाक्षिणी॥यस्याःपरतरंनास्तिसैषादुर्गाः॥तांदुर्गा
दुर्गमांदेवींदुराचारविघातिनीं॥नमामिभवभीतोहंसंसारार्णवता
रिणीं॥इदमथर्वणशीर्षंयोधीते॥सपंचाथर्वणशीर्षजपफलमाप्नो
ति॥इदमथर्वणशीर्षमज्ञात्वायोर्चांस्थापयति॥शतलक्षंजप्त्वापि
नार्चासिद्धिंविंदति॥शतमष्टोत्तरंजप्त्वापुरश्चर्याविधिःस्मृतः॥ १०४
दशवारंपठेद्यस्तुसद्यःपापैःप्रमुच्यते॥महादुर्गाणितरति॥

भगवति॥मातरस्मान्पाहिसर्वतः॥सैषाष्टौवसवः॥सैषैकादशरुद्राः
सैषाद्वादशादित्याः॥सैषाविश्वेदेवाः॥सोमपाअसोमपाश्च॥सैषा
यातुधानाअसुराराक्षांसिपिशाचायक्षासिद्धाः॥सैषासत्वरजस्तमां
सि॥सैषाब्रह्मविष्णुरुद्ररूपिणी॥सैषाप्रजापतींद्रमानवाः॥सै
षाग्रहनक्षत्रज्योतींषि॥कलाकाष्ठादिकालरूपिणी॥तामहंप्र
णौमिनित्यं॥धृ॥पापहारिणींदेवींभुक्तिमुक्तिप्रदायिनीं॥अनं
तांविजयांशुद्धांशरण्यांशिवदांशिवां॥वियदिकारसंयुक्तांवी

द्रमापृछन्॥ कोभवानिति॥ सोब्रवीदहमेकः॥ प्रथममासीत्॥ वर्त्ता
मि च भविष्यामि च॥ नान्यः कश्चिन्मत्तो व्यतिरिक्त इति॥ सोनंतरादंत
रं प्राविशेत्॥ तदेषधिमाविशेत्॥ सोहं नित्योहं अनित्योहं॥ ब्रह्मा
हं ब्रह्माहं॥ प्रांचः प्रत्यं चाहं॥ दक्षिणाग्निर्गार्हपत्यश्चाहवनीयो
हं॥ गुह्योहमरण्योहं॥ ज्येष्ठोहं श्रेष्ठोहं वरिष्ठोहं॥ ऋगहं यजु
रहं सामाहमथर्वाहं॥ अहमक्षरमहं पुष्करमहमग्निपंचः॥ अ १०५
थश्चोर्ध्वं चतिर्यक् चाहं पुरस्ता ज्योतिरिति॥ अहमेकः सर्वं च

मां॥ एवमहं यो मां वेत्ति सर्वे देवान्वेत्ति सांगानिति॥ ब्रह्मणा ब्रह्मण्यो
हं हविष्यं हविष्येण॥ सत्यं सत्येन॥ धर्मं धर्मेण॥ तर्पयामि स्वे
न तेजसा॥ ततो ह वा ऊर्ध्वबाहवो रुद्रं स्तुवंति॥ यो वै रुद्रः स भ
गवान्यश्च ब्रह्मा तेभ्यो वै नमो नमः॥ यो वै रुद्रः स भगवान्य
श्च विष्णुस्तेभ्यो वै नमो०॥ यो वै रुद्रः स भगवान्यश्च शिवस्तेभ्यो
वै न०॥ यो वै रुद्रः स भगवान्यश्च शंकरस्तेभ्यो वै न०॥ यो वै रुद्रः
स भगवान्यश्चांबरस्तेभ्यो वै न०॥ यो वै रुद्रः स भगवान्यश्च स्कं

गा०

द्रस्तेभ्योवैन०॥ योवैरुद्रःसभगवान्यश्चगणस्तेभ्योवैन०॥ योवैरुद्रः
१०६ सभगवान्यश्चगणातिपस्तेभ्योवैन०॥ योवैरुद्रःसभगवान्यश्चभूते
भ्योवैन०॥ योवैरुद्रःसभगवान्यश्चभुवस्तेभ्योवै०॥ योवैरुद्रःसभग
न्यश्चसुवस्तेभ्योवै०॥ योवैरुद्रःसभगवान्यश्चमहस्तेभ्योवै०॥ योवै
रुद्रःसभगवान्यश्चजनस्तेभ्योवै०॥ योवैरुद्रःसभगवान्यश्चतप
स्तेभ्योवै०॥ योवैरुद्रःसभगवान्यश्चसत्यंतेभ्योवै०॥ योवैरुद्रःसभ
गवान्यश्चसर्वंतेभ्योवै०॥१॥ आदौमध्येंतेचभूर्भुवस्वस्तरवेनमः १०६

महादेव्याः प्रसादतः॥ सायमधीयानोदिवसकृतंपापंनाशयति॥
प्रातरधीयानोरात्रिकृतंपापंनाशयति॥ सायंप्रातःप्रयुंजानोअपा
पोभवति॥ निशीथेतुरीयसंध्यायांजप्त्वावाक्सिद्धिर्भवति॥ नूतनायां
प्रतिमासान्निध्यंजप्त्वाप्राणानांप्रतिष्ठाभवति॥ भौमाश्विन्यांम
हादेवींसन्निधौजप्त्वासमहामृत्युंतरति॥ समहामृत्युंतरतियए
वंवेद॥१॥ इत्याथर्वणदेव्युपनिषत्संपूर्णंश्रीर्पणमस्तु॥ अ
थरुद्रोपनिषत्प्रारंभः॥ ॐ देवाहवैस्वर्गंलोकमायन्॥ तेदेवारु

१०७ गस्वरूपोसनातनः॥ हंसोहंसः स्तुविमहे सोहं हंसाय धीमहि॥ हं
सः सोहं प्रचोदयात्॥२॥ हंस हंसेति यो ब्रूयाद्धंसो नाम सदाशिवः॥
ह्रीं श्रीपतिप्राप्नुयात्परमंपदं॥ तस्योत्तरः शिरो दक्षिणतः॥ पादयोत्त
रतः॥ स ॐकारः॥ य ॐकारः॥ स प्रणवः॥ यः प्रणवः॥ सर्वव्यापी यः
सर्वव्यापी सोनंतः॥ योनंतस्तत्तारं॥ यत्तारं तच्छुक्लं॥ यच्छुक्लं तद्वैद्युतं॥ धु
यद्वैद्युतं तत्परं ब्रह्म॥ स एकः स रुद्रः स भगवान्परमेश्वरः सशंकरः॥ १०७
अथ कस्मादुच्यते ॐकारो यस्मादुच्चार्यमाणे॥ प्राणानूर्ध्वमु

न्मीलयति तस्मादुच्यते ओंकारः॥ अथ कस्मादुच्यते प्रणवो यस्मा
दुच्चार्यमाणमेव ऋग्यजुःसामाथर्वब्रह्म प्रणामयति तस्मादुच्य
ते प्रणवः॥ अथ कस्मादुच्यते सर्वव्यापी यस्मादुच्चार्यमाणमेव स्नेहो
यथा तिलपिंडं तस्मादुच्यते सर्वव्यापी॥ अथ कस्मादुच्यतेनंतो यस्मा
दुच्चार्यमाणमेव यस्यैवांतं नोपलभ्यते तिर्यगूर्ध्वमधस्तस्मादुच्य
तेनंतः॥ अथ कस्मादुच्यते तारो यस्मादुच्चार्यमाणमेव गर्भज
न्मजरामरणमहाभयात्तारयति तस्मादुच्यते तारः॥ अथ कस्मा

१०८ दुच्यतेशुक्लोयस्मादुच्चार्यमाणमेवसर्वान्लोकान्शुक्लीकरोतीतित
स्मादुच्यतेशुक्लः॥ अथकस्मादुच्यतेवैद्युतोयस्मादुच्चार्यमाणमेवअव्य
क्तमात्रंमहद्योतयतेतस्मादुच्यतेवैद्युतः॥ अथकस्मादुच्यतेपरंब्रह्मय
स्मादुच्चार्यमाणमेवसर्वान्लोकान्बृंहतिबृंहयतेतस्मादुच्यतेपरंब्र
ह्म॥ अथकस्मादुच्यतेएकोयस्मादुच्चार्यमाणमेवसर्वान्लोकान्संभ
क्षयतिसंसृजतिविसृजत्यतेतस्मादुच्यतेएकः॥ अथकस्मादुच्यते १०८
ईशानोयस्मादुच्चार्यमाणमेवसर्वैर्लोकैरीशानईशातेभिस्तस्मादुच्य

ॐभूस्तरवेभुवस्तरवेसुवस्तरवेमहस्तरवेजनस्तरवेतपस्तरवे
सत्यंतरवेनमः॥१२॥ शीर्षविश्वरूपासि॥ ब्रह्मैकस्त्वं॥ हुतमहुतम
सि॥ विश्वमविश्वमसि॥ परमंपरायणंत्वमसि॥ बालाग्रमात्रंहृ
दयस्यमध्ये॥ विश्वेदेवंज्योतिरूपंवरेण्यं॥ तमीशानंवरदंदेवमी
ड्यं॥ निश्चिंसमांशांतमत्यंतमेति॥ हृदिस्थादेवताः॥ सर्वाहृदिप्रा
णेप्रतिष्ठिताः॥ हृदिस्थमर्थियोनित्यंतिस्रोमात्राःपरांगतिः॥ यो
क्षरःपरमोध्येयःसच्चिदानंदविग्रहः॥ तारकंब्रह्म॥ ॐकारोलिं

सजायमानः सजनिष्यमाणाः प्रयंजनास्तिष्ठति शांतको शांतका
१०१ रे॥ अग्निरितिभस्म॥ वायुरितिभस्म॥ जलमितिभस्मस्थलमि
तिभस्म॥ सर्वंहवाइदंभस्मस्तस्माद्व्रतमेतत्॥ पाशुपतिभस्म
नासंस्पृशेत्॥ तस्माद्व्रतमेतत्॥ त्र्यायुषंजमदग्नेः॥ कश्यपस्य
त्र्यायुषं॥ अगस्त्यस्यत्र्यायुषं॥ यद्देवानांत्र्यायुषं॥ तन्मेअस्तुत्र्या
युषं॥ सर्वमस्तुशतायुषं॥ ४॥ यइदमथर्वणशीर्षंब्राह्मणोधीते
सोऽग्निपूतोभवति॥ सवायुपूतोभवति॥ ससूर्यपूतोभवति॥ ससो १०१

मपूतोभवति॥ सर्वैस्तीर्थैस्स्नातोभवति॥ सर्वैर्देवैर्ज्ञातोभवति॥ स
र्वैर्वेदैःपठितोभवति॥ सर्वैर्यज्ञैःक्रतुभिरिष्टंभवति॥ कल्याणगा
थानाराशंसीतिहासपुराणानिपठितानिभवंति॥ रुद्राणामेकाद
शसहस्रजप्तानिभवंति॥ प्रणवानामयुतंचजप्तंभवत्याहभगवा
नथर्वशिराः॥ ५॥ योरुद्रोयेनजगदूर्ध्वंपृथिवीचदृढंकृतायेनयशाः
संस्थापितानागाऽन्तरिक्षं॥ तस्मैरुद्रायनमोनमस्तस्मैरुद्रायन
मः॥ नमोस्तुरुद्रायसहस्रबाहवेसहस्रपादाक्षिशिरोरुबाहवे॥

११० सहस्रनाम्नेपुरुषायशाश्वतेसहस्रकोटियुगधारिणेनमः॥ नस्मैरु
द्रायनमोनमस्तस्मैरुद्रायनमः॥ ६॥ ॐ शांतिः ३॥ श्रीरुद्रोपनिषदं
श्रीरुद्रदेवतार्पणमस्तु॥ अथनारायणोपनिषत्प्रारंभः॥ ॐ भूअथ
पुरुषोहवैनारायणोकामयत॥ प्रजाःसृजेयेति॥ नारायणात्प्राणो
जायते॥ मनःसर्वेंद्रियाणिच॥ खंवायुर्ज्योतिरापःपृथिवीविश्वस्य
धारिणी॥ नारायणाद्ब्रह्माजायते॥ नारायणाद्विष्णुर्जायते॥ नारा
यणात्प्रजापतिर्जायते॥ नारायणाद्द्वादशादित्याः॥ रुद्रावसवः॥ स ११०

तेईशानः॥ अथकस्मादुच्यतेरुद्रोयस्मादुच्चार्यमाणमेवसर्वांल्लोका
नरुद्रयतिरोदयतेतस्मादुच्यतेरुद्रः॥ अथकस्मादुच्यतेभगवोया
स्मादुच्चार्यमाणमेवसर्वांल्लोकान्भगवतीभागीयतेतस्मादुच्यतेभग
वः॥ अथकस्मादुच्यतेमहेश्वरोयस्मादुच्चार्यमाणमेवसर्वांल्लोकान्म
हतिमहीयतेतस्मादुच्यतेमहेश्वरः॥ अथकस्मादुच्यतेशंकरोस
र्वांल्लोकान्रामयतिस्वहीयतेतस्मादुच्यतेशंकरः॥ तदेतदुदच
रितं॥ ३॥ एकोहिदेवःप्रदिशोनुसर्वाःपूर्वोहिजातःसउगर्भेअंतः

भवतिसविष्णुरेवभवति॥ओमित्यग्रेव्याहरेत्॥नमइतिपश्चात्॥
१११ नारायणायेत्युपरिष्टात्॥३॥ओमित्येकाक्षरंनमइतिद्वेअक्षरे॥ना
रायणायेतिपंचाक्षराणि॥एतद्वैनारायणस्याष्टाक्षरंपदं॥योवैना
रायणस्याष्टाक्षरंपदमध्येति॥अनुपप्लवःसर्वमायुरेति॥विंदतेप्रा
जापत्यं॥रायस्पोषंगौपत्यं॥ततोमृतत्वमश्नुते॥ततोमृतत्वमश्नुतः
इतिप्रत्यगानंदं॥इदंब्रह्मपुरुषंपिंगलं॥प्रणवस्वरूपं॥अकारउका १११
रमकारेति॥तानेकधासमभरत्तदेतदोमिति॥यमुक्त्वामुच्यतेयोगी

संसारबंधनात्॥४॥ॐनमोनारायणायेतिमंत्रोपासकः॥वैकुंठभु
वनंलोकंगमिष्यति॥तस्मात्तदिदंपुंडरीकंविज्ञानघनं॥तस्मात्तडिदाव
भासं॥ब्रह्मण्योदेवकीपुत्रोब्रह्मण्योमधुसूदनः॥इतिसर्वभूतस्थमे
कंवैनारायणं॥५॥कारणरूपमनाकारं॥परंब्रह्मैवेत्युपनिषत्॥ए
तदथर्वणशिरोयोधीतेसायमधीयानोदिवसकृतंपापंनाशयति॥
सायंप्रातरधीयानोऽपापोभवति॥प्रातरधीयानोरात्रिकृतंपापं
नाशयति॥माध्यंदिनमादित्याभिमुखोधीयानः॥पंचमहापातको

पपातकेभ्यो प्रमुच्यते ॥ सर्ववेदपारायणपुण्यं भवति ॥ श्रीनारायणस्सा
११२ युज्यमाप्नोति ॥ य एवं वेद ॥ श्रीनारायणोपनिषद् ॥ श्रीनारायणलक्ष्मीर्प
णमस्तु ॥ शांतिः ॥२॥ ॐ श्रीगायत्री ॥ मी स्वर्थगुणपतिरूपं जपे विनि
योगः ॥ ॐ नमस्ते गणपतये ॥ त्वमेव प्रत्यक्षं तत्त्वमसि ॥ त्वमेव केव
केवलं कर्त्तासि ॥ त्वमेव केवलं धर्त्तासि ॥ त्वमेव केवलं हर्त्तासि ॥ त्वमेव के
वलं भर्त्तासि ॥ त्वमेव सर्वं खल्विदं ब्रह्मासि ॥१॥ त्वं साक्षादात्मासि नित्यं ११२
॥ ऋतं वच्मि ॥ सत्यं वच्मि ॥ अव त्वं मां ॥ अव वक्तारं ॥ अव श्रोतारं ॥ अ

वीणिछंदांसि ॥ नारायणाद्देवसमुत्पद्यंते ॥ नारायणात्प्रवर्त्तंते ॥ ना
रायणात्प्रलीयंते ॥ नारायणात्प्ररोहंते ॥ अथनित्यो नारायणब्रह्मा च
नारायणः ॥ शिवश्च नारायणः ॥ शंकरश्च नारायणः ॥ कालश्च ना
रायणः ॥ दिशश्च नारायणः ॥ ऊर्ध्वश्च नारायणः ॥ अधश्च नाराय
णः ॥ अंतर्बहिश्च नारायणः ॥ नारायण एवेदं सर्वं ॥ यद्भूतं य
च्च भव्यं ॥२॥ निष्कलंको निरंजनो निर्विकल्पो निराख्यातः ॥ शुद्धो
देव एको नारायणो न द्वितीयोऽस्ति कश्चित् ॥ य एवं वेद ॥ स विष्णुरेव

त्वंगुणत्रयातीतः। त्वंकालत्रयातीतः त्वंदेहत्रयातीतः त्वंमूलाधा
११२ रस्थितोसिनित्यं त्वंशक्तित्रयात्मकः त्वांयोगिनोध्यायंतिनित्यं त्वंब्र
ह्मात्वंविष्णुस्त्वंरुद्रस्त्वंइंद्रस्त्वंसूर्यस्त्वंचंद्रमास्त्वमग्निस्त्वंब्रह्मभूर्भुवस्व
रोम् गणादिंपूर्वमुच्चार्यवर्णादिंस्तदनंतरं अनुस्वारःपरतरः अ
र्द्धेंदुलसितंतारेणरुद्धं एतत्तवमनुस्वरूपं गकारःपूर्वरूपं अका
रोमध्यमरूपं अनुस्वारश्चांत्यरूपं विंदुरुत्तररूपं नादःसंधानं सं
हितासंधिः सैषागणेशविद्या गणकऋषिः निचृद्गायत्रीछंदः ११३

गणपतिर्देवता ४ ॐ गंगणपतयेनमः एकदंतायविद्महेवक्र
तुंडायधीमहि तन्नोदंतिःप्रचोदयात् एकदंतंचतुर्हस्तंपाशमंकुश
धारिणं रदंचवरदंहस्तैर्बिभ्राणंमूषकध्वजं रक्तंलंबोदरंशूर्पकर्ण
कंरक्तवाससं रक्तगंधानुलिप्तांगंरक्तपुष्पैःसुपूजितं भक्तानुकंपि
नंदेवंजगत्कारणमच्युतं आविर्भूतंचसृष्ट्यादौप्रकृतेःपुरुषात्परं
एवंध्यायंतियोनित्यंसयोगीयोगिनांवरः ५ ॐ नमोव्रातपतये
नमोगणपतयेनमः प्रथमपतयेनमस्तेऽस्तुलंबोदरायएकदंताय

विघ्ननाशिने श्रीशिवसुताय वरदमूर्त्तये नमः एतदथर्वणशीर्षं योधी
११५ ते स ब्रह्मभूयाय कल्पते स सर्वतः सुखमेधते स पंचमहापापात्प्रमुच्य
ते ६ सायमधीयानो दिवसकृतं पापं नाशयति प्रातरधीयानो रात्रि
कृतं पापं नाशयति सायंप्रातरधीयानोऽपापो भवति सर्वत्राधीया
नोऽपविघ्नो भवति धर्मार्थकाममोक्षं च विंदति इदमथर्वशीर्षा
यदेयं यो यदि मोहाद्दास्यति स पापीयान्भवति सहस्रावर्तनाद्यं यं
काममधीते तं तमनेन साधयेत् ७ अनेन गणपतिमभिषिंचति ११५

वक्तारं ॥ अव धातारं अवानूचानमव शिष्यं अव पश्चात्तात् अ
व पुरस्तात् अवोत्तरात्तात् ॥ अव दक्षिणात्तात् ॥ अव चोर्ध्वात्तात्
अवाधरात्तात् ॥ सर्वतो मां पाहि समंतात् ॥ ३ ॥ त्वं वाङ्मयस्त्वं चिन्मयः त्वं
भय ४ मानंदमयस्त्वं ब्रह्ममयः त्वं सच्चिदानंदाद्वितीयोऽसि ॥ त्वं प्रत्यक्षं ब्रह्मासि
त्वं ज्ञानमयो विज्ञानमयोऽसि। सर्वं जगदिदं त्वत्तो जायते सर्वं जगदिदं
त्वत्तिष्ठति सर्वं जगदिदं त्वयि लयमेष्यतीति सर्वं जगदिदं त्वयि प्रत्ये
ति त्वं भूमिरापोनलोऽनिलो नभः ३ चत्वारि वाक्परिमिता पदानि

ससर्वविघ्नैर्वर्जितयएवंवेद ८ इतिगणपत्युपनिषदं श्रीगणपत्यर्पणमि
११५ मस्तु हरिःॐ अथसूर्याथर्वांगिरसंव्याख्यास्यामः ब्रह्माऋषिः
गायत्रीछंदः आदित्योदेवता हंसाद्यग्निनारायणयुक्तंबीजं हृल्ले
खाशक्तिः वियदादिसंयुक्तंकीलकं श्रीसूर्यनारायप्रीत्यर्थेजपेविनियो
गः षट्स्वरारूढबीजेनषडंगं रक्तांबुजसंस्थितंसप्ताश्वरथिनं
हिरण्यवर्णंचतुर्भुजं पद्मद्वयाभयवरदहस्तं कालचक्रप्रणेतारं
श्रीसूर्यनारायणंयएवंवेद १ सवैब्राह्मणः ॐभूः ॐभुवः ॐ ११५

सुवः ॐमहः ॐ जनः ॐ तपः ॐ सत्यं ॐ तत्सवितुर्वरेण्यंभर्गोदेव
स्यधीमहि धियोयोनःप्रचोदयात् परोरजसेसावदोम् आपोज्यो
तिरसोमृतंब्रह्मभूर्भुवस्वरोम् सूर्यआत्मा जगतस्तस्थुषश्च सूर्या
द्वैखल्विमानिभूतानिजायंते सूर्याद्यज्ञःपर्जन्योन्नमात्मा नमस्ते
आदित्याय त्वमेवकेवलंकर्मकर्तासि त्वमेवप्रत्यक्षंब्रह्मासि त्व
मेवप्रत्यक्षंविष्णुरसि त्वमेवप्रत्यक्षंरुद्रोसि त्वमेवप्रत्यक्षंऋ
ग्सि त्वमेवप्रत्यक्षंयजुरसि त्वमेवप्रत्यक्षंसामासि त्वमेवप्रत्य

क्षमथर्वोसि त्वमेवसर्वंछंदोसि २ आदित्याद्वायुर्जायते आदित्याद्भू
११६ मिर्जायते आदित्यादापोजायते आदित्याज्योतिर्जायते आदित्याद्वे
दाजायंते आदित्याद्देवाजायंते आदित्योवाएषएतन्मंडलंतपति अ
सावादित्योब्रह्म आदित्योंतःकरणमनोबुद्धिचित्ताअहंकारः आदि
त्योवैव्यानःसमानोदानोपानप्राणाः आदित्योवैश्रोत्रत्वक्चक्षुरसनान
साः आदित्योवैवाक्पाणिपादोपस्थपायवि आदित्योवैशब्दस्पर्श
रूपरसगंधाः आदित्योवैवचनादानगमनानंदविसर्गाः आनंदम ११६

सवाग्मीभवति चतुर्थ्यामनश्नंजपति सविद्यावान्भवति इत्यथर्व
ण वाक्यंब्रह्माद्यावरणंविद्यात् नबिभेतिकदाचनेति योदूर्वांकुरैर्यजति
सवैश्रवणोपमोभवति योलाजैर्यजति सयशोवान्भवति समेधावा
न्भवति योमोदकसहस्रेणयजते सवांछितफलमवाप्नोति यःसाज्यस
मिद्भिर्यजति ससर्वंलभते अष्टौब्राह्मणान्सम्यग्ग्राहयित्वा सूर्य
वर्चस्वीभवति सूर्यग्रहणेमहानद्यांप्रति(मा)सन्निधौवाजप्त्वासिद्धमंत्रो
भवति महाविघ्नात्प्रमुच्यते महादोषात्प्रमुच्यते ससर्वविद्भवति

वितानोरास्वतांदीर्घमायुः ओमित्येकाक्षरंब्रह्म घृणिरितिद्वे अक्षरे सूर्य
११७ इत्यक्षरद्वयं आदित्योमितित्रीण्यक्षराणि एतद्वैश्रीसूर्यस्याष्टाक्षरंमनुं
यःसदाहरहर्जपति सब्राह्मणस्सुब्राह्मणोभवति सूर्याभिमुखंजप्त्वा म
हापापात्महादोषात्प्रमुच्यतेइत्युपनिषत् ब्राह्मणेनमः शांतिः ३ ४
इत्यथर्वणपंचोपनिषदंसंपूर्णम् श्रीगायत्र्यर्पणमस्तु।। अथवेदोक्तपं
चसूक्तप्रारंभः हरिःॐम् संवांकर्मणासमिषाहिनोमींद्राविष्णूअपस
स्यपारेअस्यजुषेथांयज्ञंद्रविणंचधत्तमरिष्टैर्नःपथिभिःपारयंतो पावि ११७

श्वासांजनितारामतीनामिंद्राविष्णूकलशासोमधाना प्रवांगिरःश
स्यमानाअवंतु प्रस्तोमासोगीयमानासोअर्कैः इंद्राविष्णूमदपतीम
दानामासोमंयातंद्रविणोदधाना संवामंजंत्वक्तुभिर्मतीनांसंस्तोमास
ःशस्यमानासउक्थैः आवामश्वासोअभिमातिषाहइंद्राविष्णूसधमा
दोवहंतु जुषेथांविश्वाहवनामतीनामुपब्रह्माणिशृणुतंगिरोमे इं
द्राविष्णूतत्पनयाय्यंवांसोमस्यमदउरुचक्रमाथे अकृणुतमंतरि
क्षंवरीयोप्रथतंजीवसेनोरजांसि इंद्राविष्णूहविषावावृधानाग्रा

दानानमसारातहव्या घृतासुतीद्रविणंधत्तमस्मेसमुद्रःस्थःकलशः
११८ सोमधानः इंद्राविष्णूपिबतंमध्वोऽअस्यसोमस्यदस्राजठरंपृणेथां आ
वामंधांसिमदिराण्यग्मन्नुपब्रह्माणिशृणुतंहवंमे उभाजिग्यथुर्नपरा
जयेथेनपराजिग्येकतरश्चनैनोः इंद्रश्चविष्णोयदपस्पृधेथांत्रेधास
हस्रंवितदैरयेथां १ श्रीविष्णुसूक्तंसंपूर्णम् अथरुद्रसूक्तप्रारंभः
हरिःॐ सोमारुद्राधारयेथामसुर्यं १ प्रवामिष्टयोरमश्नुवंतु दमेद ११८
मेसप्तरत्नादधानाशंनोभूतंद्विपदेशंचतुष्पदे सोमारुद्राविवृहतंवि

योऽज्ञानमयोविज्ञानमयआदित्यः नमोमित्रायभानवेमृत्योर्मापाहि
भ्राजिष्णवेविश्वहेतवेनमः अग्निर्नःपार्थिवेभ्यः सूर्योनोदिवस्पातुवा
तोऽअंतरिक्षात् अग्निर्नःपार्थिवेभ्यः सूर्याद्भवंतिभूतानि सूर्येणपालि
तानितु सूर्येलयंप्राप्नुवंति यःसूर्यःसोहमेवच चक्षुर्नोदेवःसविता
चक्षुर्नउतपर्वतः चक्षुर्धातादधातुनः आदित्यायविद्महेसहस्रकराय
धीमहि तन्नःसूर्यःप्रचोदयात् २ सवितापश्चात्तात्सवितापुरस्ता
त् सवितोत्तरात्तात्सविताधरात्तात् सवितानःसुवतुसर्वतातिं स

स्यचेतति अवंनवंतीरूपनोदुरश्चरानमीवोरुद्र जासुनोभव याते दिद्युद
११९ वसृष्टादिवस्परिक्ष्मया चरति परिसावृणक्तुनः सहस्रंतेस्वपिवात भेषजा
मानस्तोकेषुतनयेषुरीरिषः मानोवधीरुद्रमापरादामातेभूमप्रसितौ
हीळितस्य आनोभजबर्हिषिजीवशंसेयूयंपातस्वस्तिभिः सदानः २
श्रीरुद्रसूक्तं श्रीरुद्रार्पणमस्तु श्रीदेवीसूक्तं प्रारंभः ओम् यस्तित्या
जसचिविदंसखायंनतस्यवाच्यपिभागोऽअस्ति यदींशृणोत्यलकं
शृणोतिनहिप्रवेदसुकृतस्यपंथां सक्तुमिवतितउनापुनंतोयत्र धीरा ११९

मनसावाचमक्रत अत्रासखायः सख्यानिजानतेभद्रैषांलक्ष्मीर्निहिता
धिवाचि गौरीर्मिमायसलिलानितक्षत्येकपदीद्विपदीसाचतुष्पदी। अष्टा
पदीनवपदीबभूवुषीसहस्राक्षरापरमेव्योमन् हरिः हिः ॐ हिरण्यवर्णां
हरिणींसुवर्णरजतस्रजां चंद्रांहिरण्मयींलक्ष्मींजातवेदोममावह तां
मआवहजातवेदोलक्ष्मीमनपगामिनीं यस्यांहिरण्यंविंदेयंगामश्वंपु
रुषानहं अश्वपूर्वांरथमध्यांहस्तिनादप्रमोदिनीं श्रियंदेवीमुपह्वये
श्रीर्मादेवीजुषतां कांसोस्मितांहिरण्यप्राकारामार्द्रांज्वलंतींतृप्तां

गा०

तर्पयंतीं पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियं चंद्रां प्रभासां यशसा
१२० ज्वलंतीं श्रियं लोके देवजुष्टामुदारां तां पद्मनेमिं शरणमहं प्रपद्ये अलक्ष्मी
र्मे नश्यतां त्वां वृणोमि आदित्यवर्णे तपसोधि जातो वनस्पतिस्तव वृक्षोथ बि
ल्वः तस्य फलानि तपसा नुदंतु मायांतराया श्च बाह्या अलक्ष्मीः उ
पैतु मां देवसखः कीर्तिश्च मणिना सह प्रादुर्भूतोस्मि राष्ट्रेस्मिन् कीर्तिमृद्धिं
ददातु मे क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहं अभूतिमस
मृद्धिं च सर्वां निर्णुद मे गृहात् गंधद्वारां दुराधर्षां नित्यपुष्टां करीषि १२०

ष्वीं मम । वायानोगयमाविवेश आरे बाधेथां निर्ऋतिं पराचैरस्मे भद्रा
सौश्रवसानि संतु सोमारुद्रा युवमेतान्यस्मे विश्वा तनूषु भेषजानि ध
त्तं अवस्यतं मुंचतं यन्नो अस्ति तनूषु बद्धं कृतमेनो अस्मत् तिग्मा
युधौ तिग्महेती सुशेवौ सोमारुद्राविह सुमृळतं नः प्र नो मुंचतं वरुण
स्य पाशाद्गोपायतं नः सुमनस्यमाना १ ॐ इमा रुद्राय स्थिरधन्वने
गिरः क्षिप्रेषवे देवाय स्वधाव्ने अषाळ्हाय सहमानाय वेधसे तिग्मायु
धाय भरता शृणोतु नः सहि क्षयेण क्षम्यस्य जन्मनः साम्राज्येन दिव

लक्ष्मीमनपगामिनीं यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विंदेयं पुरुषा
१२१ नहं यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहं श्रियः पंचदशर्चं च श्री
कामः सततं जपेत् १५ श्रीमहादेव्यार्पणमस्तु हरिः हरिः ॐ अंबि
तमे नदीतमे देवितमे सरस्वति अप्रशस्ता इव स्मसि प्रशस्तिमंब न
स्कृधि त्वे विश्वा सरस्वति श्रितायूंषि देव्यां शुनहोत्रेषु मत्स्व प्रजां देवि
दिदिड्ढि नः इमा ब्रह्म सरस्वति जुषस्व वाजिनीवति या ते मन्म गृत्स
मदा ऋतावरि प्रिया देवेषु जुह्वति प्रेतां यज्ञस्य शंभुवा युवामिदा १२१

वृणीमहे अग्निं च हव्यवाहनं द्यावा नः पृथिवी इमं सिध्रमद्य दिविस्पृ
शं यज्ञं देवेषु यच्छतां आ वामुपस्थमद्रुहा देवाः सीदंतु यज्ञियाः इहा
द्य सोमपीतये ७ श्रीगायत्रीसावित्रीसरस्वतीर्पणमस्तु श्रीगणपति
सूक्तप्रारंभः ॐ गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रव
स्तमं ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद साद
नं आ तू न इंद्र क्षुमंतं चित्रं ग्राभं सं गृभाय महाहस्ती दक्षिणेन वि
भा हि त्वा तुविकूर्मिं तुविदेष्णं तुवीमघं तुविमात्रमवोभिः नहि त्वा शू

रदेवानमर्तोसोहिसंतं भीमंनगांवारयंते एनोन्विंद्रस्तवामेशानंवस्व
१२२ स्वराजं नराधसामधिर्षिनः प्रस्तोषदुपगासिषश्रवत्सामगीयमानं॥
अभिराधसाजुगुरत् आनोभरदक्षिणेनाभिसव्येनप्रमृश इंद्रमानोव
सोग्निभीकू उपक्रमस्वाभरधृषताधृष्णोजनानां अदाशूष्टरस्यवेदः
इंद्रयउनुतेअस्तिवाजोविप्रेभिःसनित्वः अस्माभिःसुतंसनुहि सद्यो
जुवस्तेवाजाअस्मभ्यंविश्वश्चंद्राः वशैश्चमक्षूजरंते निषुसीदगण
पतेगणेषु त्वामाहुर्विप्रतमंकवीनां नऋतेत्वत्क्रियतेकिंचनारेमहाम १२२

कीं ईश्वरींसर्वभूतानांतामिहोपव्हयेश्रियं मनसःकाममाकूतिंवाच
:सत्यमशीमहि पशूनांरूपमन्नस्यमयीश्रीःश्रयतांयशः कर्दमेनप्रजा
भूतामयिसंभवकर्दम श्रियंवासयमेकुलेमातरंपद्ममालिनीं आप
स्रजंतुस्निग्धानिचिक्लीतवसमेगृहे निचदेवींमातरंश्रियंवासयमे
कुले आर्द्रांपुष्करिणींपुष्टींसुवर्णांहेममालिनीं सूर्यांहिरण्मयींल
क्ष्मींजातवेदोममावह आर्द्रांयःकरिणींयष्टींपिंगलांपद्ममालिनीं
चंद्रांहिरण्मयींलक्ष्मींजातवेदोममावह ताम्मआवहजातवेदोल

णुते द्योरुपस्थे अनंतमन्यद्रुशदस्यपाजः कृष्णमन्यद्धरितः संभरंति
१२२ अद्यादेवा उदिता सूर्यस्य निरंहसः पिपृता निरवद्यात् तन्नोमित्रोवरुणोमा
महंतामदितिः सिंधुः पृथिवी उतद्यौः १ उदुत्यंजातवेदसं देवंवहंति केत
वः दृशे विश्वाय सूर्यं अपत्ये तायवो यथा नक्षत्रा यंत्यक्तुभिः सूरायवि
श्वचक्षसे अदृश्रमस्य केतवो विरश्मयो जनाँ अनु भ्राजंतो अग्नयोय
था तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य विश्वमाभासि रोचनं प्रत्य
ङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषान् प्रत्यङ् विश्वं स्वर्दृशे येनापावक १२३

चक्षसा भुरण्यंतं जनाँ अनु त्वं वरुण पश्यसि वि द्यामेषि रजस्पृथ्वहा
मिमानो अक्तुभिः पश्यञ्जन्मानि सूर्य सप्तत्वा हरितो रथे वहंति देव सूर्य
शुंध्युं २ शोचिष्केशं विचक्षण अयुक्त सप्त सूरो रथस्य नप्त्यः ताभिर्या
ति स्वयुक्तिभिः उद्वयं तमसस्परि ज्योतिष्पश्यंत उत्तरं देवं देवत्रा सू
र्यमगन्म ज्योतिरुत्तमं २ उद्यन्नद्य मित्रमहः आरोहन्नुत्तरां दिवं
हृद्रोगं मम सूर्य हरिमाणं च नाशय शुकेषु मे हरिमाणं रोपणाकासु
दध्मसि अथो हारिद्रवेषु मे हरिमाणं निदध्मसि उदगादयमादित्यो
पु

विश्वेन सहसा सह द्विषंतं मह्यं रंधयन्मो अहं द्विषते रधं २ मित्रो
१२४ जनान्यातयति ब्रुवाणो मित्रो दाधार पृथिवीमुत द्यां मित्रः कृष्टीरनिमिषा
भिचष्टे मित्राय हव्यं घृतवज्जुहोत प्रसमित्रमर्तो अस्तु प्रयस्वान्यस्त
आदित्य शिक्षति व्रतेन न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यं
तितो न दूरात् अनमीवास इळया मदंतो मितज्ञवो वरिमन्ना पृथि
व्याः आदित्यस्य व्रतमुपक्षियंतो वयं मित्रस्य सुमतौ स्याम अयं मि
त्रो नमस्यः सुशेवो राजा सुक्षत्रो अजनिष्ट वेधाः तस्य वयं सुमतौ १२४

ॐ मघवं चित्रमर्च्च १ ऋद्धिबुद्धिसहित श्रीमहागणपतिसूक्तं गणप
तीर्पणमस्तु सौरप्रारंभः हरिः ॐ चित्रं देवानामुदगादनीकं च
क्षुर्मित्रस्य वरुणस्याग्नेः आप्रा द्यावापृथिवी अंतरिक्षं सूर्य आत्मा ज
गतस्तस्थुषश्च सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात्
यत्रा नरो देवयंतो युगानि वितन्वते प्रति भद्राय भद्रं भद्रा अश्वा हरितः
सूर्यस्य चित्रा एतग्वा अनुमाद्यासः नमस्यंतो दिव आ पृष्ठमस्थुः प
रि द्यावापृथिवी यंति सद्यः तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं क

यज्ञियस्यापिभद्रेसौमनसेस्याम महाँआदित्योनमसोपसद्योया
तयज्जनोगृणतेसुशेवः तस्माऽएतत्पन्यतमायजुष्टमग्नौमित्रा
यहविराजुहोत ५ मित्रस्यचर्षणीधृतोवोदेवस्यसानसि द्युम्नं
चित्रश्रवस्तमं अभियोमहिनादिवंमित्रोबभूवसप्रथाः अभिश्रवो
भिःपृथिवीं मित्रायपंचयेमिरेजनाऽअभिष्टिशवसे सदेवान्विश्वा
बिभर्त्ति मित्रोदेवेष्वायुषुजनायवृक्तबर्हिषे इषऽइष्टव्रताऽअकः
४ श्रीसवितासूर्यनाराणसूक्तऋग्वेदांतर्गतसंपूर्णं श्रीपण

श्रीमहागायत्रीयंत्रपूजन अर्घ्यप्रदानादि अर्गलादिलक
१२५ सहस्रनामहृदयकवचपंजरादिन्यासध्यानमोचनपंचोपचा
पसेचोपविधिवेदोक्तसूक्तादि संपूर्ण बेनीरामतपस्वी
उनकापुस्तक कार्यकारणसंध्याविधिलिख्यते

तत्रयेणभूतान्युत्साद्य॥ पृथ्वीत्वयामितिमंत्रान्पठित्वा॥ आसनमु
१२६ पविश्य॥ ॐभूर्भुवस्स्वरोम्॥ रक्ताक्षतैः पूजयेत्॥ आधारशक्त्या
सनायनमः॥ ॐकूर्मासनायनमः॥ ॐअनंतासनायनमः॥ ॐ
योगासनायनमः॥ ॐतन्मध्येपरमसुखासनायनमः॥ ॐसर्व
भूतनिवारणायशार्ङ्गयसशरायअस्त्रराजायसुदर्शनायहुंफ
ट्दिग्बंधः॥ ॐतीक्ष्णदंष्ट्रमहाकायकल्पांतदहनोपम॥ भैरवाय
नमस्तुभ्यंअनुज्ञांदातुमर्हसि॥१॥ क्षेत्रपालानुज्ञांगृहीत्वा॥ यो १२६

निमुद्रांस्वशिरसिबध्वानमेत्॥ ॐगुरुभ्योनमः॥ ॐदुंदुर्गायै
नमः॥ ॐगंगणपतयेनमः॥ क्षंक्षेत्रपालायनमः॥ संसरस्वत्यैन
मः॥ ॐअंआत्मनेनमः॥ ॐपंपरमात्मनेनमः॥ केशवेत्याचम्य॥
प्रणवस्येतिमुच्चार्य॥ षोडशवारंगायत्रींजपेत्॥ देशकालौसंकी
र्त्य॥ सुमुखश्चेत्यादिपुण्यतिथौ॥ आत्मनोन्यस्यवावातकंपैत्तिकं
श्लेष्मिकंसांनिपातकंज्वरंसंततज्वरंविस्फूचिकज्वरंभ्रूलज्वरंकंडु
रोगंभगंदरंमुखरोगंव्रणप्रमेहंभूतप्रेतपिशाचब्रह्मराक्षसर्वे

सू॰ अ॰

चरकंदर्पविषमसर्वमंत्रयंत्रतंत्रप्रभंजनसर्वग्रहोच्चालनलधुमं
१२७ त्रादिबाधांअकालहत्ताक्षिशूलसर्वशूलपार्श्वशूलनामकर्णकटि
शूलदंतशूलमुखशूलस्तनशूलबाहुशूलकुक्षिशूलनाभिशूलतिर्यक्
शूलशूरुदशूललिंगशूलअंडशूलयोनिशूलव्रणशूलमस्तकशूल
गंडशूलशिरशूलशिरोर्धशूलउदरशूलपादशूलवायुशूलसक
लशूलादिसर्वरोगादिपीडासर्वभोगादिपीडासर्वग्रहदुष्टपीडा
सर्वभूतपीडासर्वप्रेतपीडासर्वपिशाच्यपीडादिनिवारणार्थं १२७

राम

श्रीगुरुगणपतिइष्टदेवताभ्योनमः॥अथसूर्यार्घ्यप्रयोगविधान
प्रारंभः॥शुद्धदेशेजलेवास्थलेवाअशिनआचांतः॥ऊर्ध्वकेशी
विरूपाक्षीमांसशोणितभोजने॥तिष्ठदेविशिखाबंधेचामुंडेपाप
राजिते॥१॥इत्यनेनवागायत्र्यावामानस्तोकेत्यनेनशिखांबध्वा
आचम्य॥सहस्रशीर्षेतिऋचेनबाहुद्वयंस्पृष्ट्वा॥उत्तिष्ठंतिहभू
तानिभूमौतिष्ठंतिभूपतिः॥सर्वेषामविरोधेनब्रह्मकर्मसमार
भेत॥१॥अपसर्पंतुयेभूतायेभूताभुविसंस्थिता॥वामपादघा

मा॥भैरवायनमस्तुभ्यंअनुज्ञांदातुमर्हसि॥१॥इतिभैरवंप्रणम्य॥
१२८ तेनाज्ञया॥ह्रःअस्त्रायफट्॥शुद्धोदकेनभूमींसंप्रोक्ष्यांकुशाग्रेणसं
ताड्य॥ऐंकवचायहुं॥इतिदिक्षु॥व्याघ्राजिनादिस्तीर्यद्वादशाङ्गाथाप्रणवा
दिनामूलमंत्रेणसंप्रोक्ष्य॥पुष्पाक्षतादिभिःसंपूज्य॥ॐआंह्रींक्रों
लींब्रह्मणेपृथिव्याधिपतयेनमोब्रह्मप्रेतःश्रियापादुकांपूजयामिन
मः॥ऐंह्रींश्रींह्रींलींविष्णवेजलाधिपतयेनमोविष्णुप्रेतःश्रियापादुकां
पूजयामिनमः॥ॐआंह्रींक्रोंरुद्रायपतयेतेजोधिपतयेनमोरुद्र

प्रेतःश्रियापादुकांपूजयामिनमः॥ॐआंह्रींक्रोंलैंईश्वरायवायुर
धिपतयेनमोईश्वरप्रेतश्रियापादुकांपूजयामिनमः॥इतिचतुर्द्वाः
ॐआंह्रींक्रोंलौंहसौंवियदधिपतयेपंचवक्त्रायसदाशिवायनमोस
दाशिवप्रेतःश्रियापादुकांपूजयामिनमः॥आसनतलेमध्ये॥ब्र
ह्माविष्णुश्चरुद्रश्चईश्वरश्चसदाशिवः॥एतेपंचमहाप्रेताःपाद
मूलेव्यवस्थिताः॥५॥तदनंतरासनेस्थिरंपद्मासनेनिधाय॥
पृथिवींप्रार्थयेत्॥पृथ्वीत्यस्यमंत्रस्यवराहऋषिः॥गायत्रीछंदः॥

सू० ७०

१२९ पृथ्वीदेवता॥ लांबी जंलींशक्तिः लूंकीलकं मम सूर्यानुष्ठानसिध्यर्थं
जपेविनियोगः॥ ॐ लांभूम्यै अंगुष्ठाभ्यां नमः॥ लिंविश्वंभरायै तर्जनी०
लूंधात्र्यै मध्यमाभ्यां नमः॥ लैंधरिण्यै अनामिकाभ्यां नमः॥ लौंपृथि
व्यै कनिष्ठिकाभ्यां नमः॥ लःउर्विकायै करतलपृष्ठाभ्यां नमः॥ एवं हृद
यादि॥ भूर्भुवस्वरोमितिदिग्बंधः॥ अथध्यानं॥ विष्णुशक्तिः समुत्पन्ने
शंखवर्णमही तले॥ अनेकरत्नसंपन्ने भूमिदेव्यै नमोस्तुते॥ १॥ स्योना
पृथिवीभवा नृक्षरानिवेशनी॥ यछानः शर्मसप्रथः॥ धनुर्धरायविद्म

१२९

ऋद्धिकरं प्रभाकरं सर्वशत्रुक्षयकरं उत्साहबलवर्द्धनं मर्त्यलोकव
शंकरं ऐश्वर्यपुत्रपौत्रदातारं श्रीसविता सूर्यनारायणप्रीत्यर्थं
तच्चाकस्मोक्तविधिना अर्घ्यप्रदानं गायंत्रपूजनं वा यथाशक्ति
नमस्तनकुरिष्ये॥ इतिसंकल्प्य॥ अथभूतशुद्धिः भूतशुद्धिः प्राण
प्रतिष्ठा अंतर्मातृका बहिर्मातृकां कुर्यात्॥ तथाच भूतशुद्धिः प्रका
रः॥ ॐ गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः॥ गुरुरेव परब्रह्म
तस्मै श्रीगुरवे नमः॥ १॥ तीक्ष्णदंष्ट्र महाकायकल्पांतदहनोप

॥७॥अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया॥ चक्षुरुन्मीलितं
१३० येन तस्मै श्रीगुरवे नमः॥८॥ इति भूतोपसारणं कुर्यात्॥ इति गुरुं
मनसि संस्मृत्य॥ इति भूतशुद्धिः श्रीसविता सूर्यनारायणार्पणमस्तु
॥श्रीसविता सूर्यनारायणप्रीत्यर्थं मम शरीरशुद्ध्यर्थं भूतशुद्धिं
करिष्ये॥ ॐ अस्य श्रीमच्छरीरस्यांतर्यामि ऋषिः॥ प्रकृतिपुरुष
श्छंदः॥ सत्या देवता॥ हं बीजं॥ स्वाहा शक्तिः॥ सोऽहं कीलकं॥ शरी १३०
रशुद्ध्यर्थं भूतशुद्धिमंत्रजपे विनियोगः॥ ततो न्यासस्थानानुमा

न्यातु संकरन्॥ अहमिति ब्रह्मरंध्रे सहस्राब्जे नियोजयेत्॥ लं अं
गुष्ठाभ्यां नमः॥ ॐ वं तर्जनीभ्यां नमः॥ रं मध्यमाभ्यां नमः॥ यं अ
नामिकाभ्यां नमः॥ हं कनिष्ठिकाभ्यां नमः॥ ॐ अतनुसूक्ष्मात्मने
प्रबोधकरतलकरपृष्ठाभ्यां नमः॥ अथ हृदयादिन्यासः॥ लं हृद
याय नमः॥ ॐ वं शिरसे स्वाहा॥ ॐ रं शिखायै वौषट्॥ यं कवचा
य हुं॥ ॐ नेत्रत्रयाय वौषट्॥ ॐ अतनुसूक्ष्मप्रबोधात्मनेऽस्त्रा
य फट्॥ भूर्भुवःस्वरोमिति दिग्बंधः॥ ॐ अथ ध्यानं॥ ब्रह्मकंद

समुद्भूतं ज्ञाननालं सुशोभितं ॥ ऐश्वर्याष्टदलोपेतं परवैराग्य
१३१ कारकं ॥१॥ अधोमुखं तु हृत्पद्मं प्रणवेनोर्ध्वमुन्नयेत् ॥ तत्रस्थं
चिन्मयात्मानं हंसोऽस्मीत्युच्चरन्बुधः ॥२॥ हंसः सोहमिति मूलाधा
रादिमस्तकांतं व्यापयेत् ॥ हृत्कमलस्थितं जीवात्मानं सुषुम्णया ना
ड्या निर्गमय्य ॥ ब्रह्मरंध्रे सहस्रारस्थितपरमात्मना सह हंसं
पद्ममुद्रया एकीकृत्य ॥ तद्रक्षणार्थं मृतबीजं द्वादशवारं
जपित्वा ॥ तेन योजयेत् ॥ इति भूतशुद्धिः ॥ श्री सवितासूर्य १३१

हंसवीधाराय धीमहि ॥ तन्नो धरः प्रचोदयात् ॥ लमिति पृथ्वीबी
जेन द्वादशवारमभिमंत्र्य ॥ तदुपरि आसनमुपविश्य ॥ ततः क
रेण योनिमुद्रां शिवादिगुरुभ्यो नमः ॥ इति स्वशिरसि विन्यसेत् ॥
ॐ ऐं ह्रीं श्रीं गुं गुरुभ्यो नमः ॥ ॐ ऐं ह्रीं श्रीं गं गणपतये नमः ॥ ॐ
ऐं ह्रीं श्रीं सं सरस्वत्यै नमः ॥ ॐ ऐं ह्रीं श्रीं दुं दुर्गायै नमः ॥ ॐ ऐं ह्रीं
श्रीं क्षं क्षेत्रपालाय नमः ॥ ततः श्रीगुरुं ध्यायेत् ॥ अखंडमंडला
कारं व्याप्तं येन चराचरं ॥ तत्पदं दर्शितं येन तस्मै श्रीगुरुभ्यो नमः

ॐ डं ढं णं उं त्वक्चक्षुश्रोत्रजिह्वाघ्राणात्मने ऊं मध्यमाभ्यां नमः ॥ ॐ एं तं
१३२ थं दं धं नं वाक्पाणिपादपायूपस्थात्मने ऐं अनामिकाभ्यां नमः ॥ ॐ पं फं
बं भं मं ओं मनोबुध्यहंकारचित्तविज्ञानात्मने औं कनिष्ठिकाभ्यां नमः
ॐ यं रं लं वं शं षं सं हं ळं क्षं अं वचनादानगमनविसर्गानंदात्मने अः कर
तलकरपृष्ठाभ्यां नमः ॥ अथ हृदयादि ॥ ॐ कं खं गं घं ङं अं पृथिव्या
पस्तेजोवायुराकाशात्मने आं हृदयाय नमः ॥ ॐ चं छं जं झं ञं इं शब्दस्प
र्शरूपरसगंधात्मने ईं शिरसे स्वाहा ॥ ॐ टं ठं डं ढं णं उं श्रोत्रजिह्वाघ्रा १३२

णात्मने ऊं शिखायै वौषट् ॥ ॐ तं थं दं धं नं एं वाक्पाणिपादपायुपस्था
त्मने ऐं कवचाय हुं ॥ ॐ पं फं बं भं मं ओं मनोबुध्यहंकारचित्तवि
ज्ञानात्मने औं नेत्रत्रयाय वौषट् ॥ ॐ अं यं रं लं वं शं षं सं हं ळं क्षं अः
वचनादानगमनविसर्गानंदात्मने अः अस्त्राय फट् ॥ भूर्भुवस्स्वरो
मिति दिग्बंधः ॥ अथ ध्यानं ॥ रक्तां बोधिस्थपोतोल्लसदरुणस
रोजाधिरूढां कराब्जैः पाशं कोदंडमिक्षूद्भवमणिगुणमप्यंकुशं
पंचबाणान् ॥ बिभ्राणां सृक्कपालं त्रिनयनलसितां पीनवक्षो

सू०

सहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥१०॥ अ०

१३२ आं ह्रीं क्रों यं रं लं वं शं षं सं हों हं सः ॥ मम जीव इह स्थितः ॥ ॐ आं ह्रीं क्रों

यं रं लं वं शं षं सं हों हं सः ॥ मम सर्वेंद्रियाणि पृथिव्यापस्तेजोवायुराका

शशब्दस्पर्शरूपरसगंध त्वक्चक्षुश्रोत्रजिह्वाघ्राणवाक्पाणिपा

दपायूपस्थानमनोबुध्यहंकारचित्तविज्ञानप्राणापानोदानसमानना

गकूर्मकृकलदेवदत्तधनंजयत्वग्मांसमेदोस्थिमज्जाशुक्रधातव इ

हागत्य इह मायां तु सुखं चिरं जीवंति ष्ठंतु स्वाहा ॥ ॐ आं ह्रीं क्रों यं १३२

नारायणार्पणमस्तु ॥ श्री सविता सूर्यनारायणप्रीत्यर्थं प्राणप्र

तिष्ठां करिष्ये ॥ ॐ अस्य श्री प्राणप्रतिष्ठापनमंत्रस्य ब्रह्माවि

ष्णुमहेश्वर ऋषयः ॥ ऋग्यजुःसामाथर्वणछंदांसि ॥ प्राणशक्तिः

परमात्मा देवता ॥ आं बीजं ॥ ह्रीं शक्तिः ॥ ॐ क्रों किलकं ॥ प्राण

प्रतिष्ठापने विनियोगः ॥ अथ न्यासः ॥ ॐ कं खं गं घं ङं अं पृथि

व्यापस्तेजोवायुराकाशात्मने आं अंगुष्ठाभ्यां नमः ॥ ॐ चं छं जं

झं ञं इं शब्दस्पर्शरूपरसगंधात्मने ईं तर्जनीभ्यां नमः ॥ ॐ टं

रंलंवंशंषंसंहोंहंसः॥ मम प्राणाः इह प्राण आगत्य सुखं चिरं तिष्ठं
तु स्वाहा॥ ॐ चत्वारि वाक्‌परिमिता पदानि तानि विदुर्ब्राह्मणा ये म
नीषिणः॥ गुहा त्रीणि निहिता नेंगयंति तुरीयं वाचो मनुष्या वदंति
॥ अमृतं वै प्राणा अमृतमापः प्राणानेवा यथा स्थानामुपह्वयते॥
असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगं॥ ज्यो
क्पश्येम सूर्यमुच्चरंतमनुमते मृळया नः स्वस्ति॥ जन्मा षट्सं
स्कारसिध्यर्थं षोडशवारं मूलमंत्रं जपेत्॥ इति प्राणप्रतिष्ठा

संपूर्णमस्तु॥ श्रीसवितासूर्यनारायणप्रीत्यर्थं अंतर्मातृका
१३६ सरस्वति जपमहं करिष्ये॥ अस्य श्री अंतर्मातृका सरस्वति दे
वता॥ महाराज महामंत्रस्य ब्रह्माऋषिः गायत्री छंदः॥ हलौं बी
जानि॥ स्वराः शक्तयः॥ बिंदवः कीलकं॥ ॐ श्री अंतर्मातृका स
रस्वति देवताप्रसादसिध्यर्थे जपे न्यासे विनियोगः॥ ॐ कं खं गं
घं ङं अं आं अंगुष्ठाभ्यां नमः॥ ॐ इं चं छं जं झं ञं ईं तर्जनीभ्यां न १३६
मः॥ ॐ उं टं ठं डं ढं णं ऊं मध्यमाभ्यां नमः॥ ॐ एं तं थं दं धं नं ऐं

रांयोवनारंभरूढां॥ सर्वालंकारयुक्तां सरसिजनयनामिंदुसंक्रांतमौ
१२५ लीं अंबापाशांकुशेष्टामभयवरकरां मातृकांतां नमामि॥ ११॥ आधा
रे लिंगनाभौ प्रकटितहृदये तालुमूले ललाटे द्वे पत्रे षोडशारे द्विदशद
शदले द्वादशार्धे चतुष्के॥ वासांते बालमध्ये डफकठसहिते कंठदेशे स्व
राणां हंक्षं तत्वार्थयुक्तं सकलदलगतं वर्णरूपं नमामि॥ १२॥ स्वराः कंठदे
शे॥ अं नमः इति सर्वत्र मातृकाप्रकारः॥ ॐ अं नमः ॐ आं नमः इं नमः
ईं नमः उं नमः ऊं नमः ऋं नमः ॠं नमः लृं नमः लॄं नमः एं नमः ऐं नमः ओं नमः १२५

औं नमः अं नमः अः नमः॥ १६॥ कंठांतं च हृदाब्जे॥ ॐ कं नमः खं नमः॥
गं नमः घं नमः ङं नमः चं नमः छं नमः जं नमः झं नमः ञं नमः टं नमः॥
ठं नमः॥ १२॥ डफान्नाभौ॥ डं नमः ढं नमः णं नमः तं थं नमः दं नमः धं नमः
नं नमः पं नमः फं नमः॥ १०॥ बमलांलिंगे॥ बं नमः भं नमः मं नमः यं नमः
रं नमः लं नमः॥ ६॥ वासांतं च गुदोर्थे॥ वं नमः शं षं सं नमः ४॥ हं क्षं नमः
भ्रुवोर्मध्ये॥ सहस्रस्य लोमविलोमं दलप्रणवादि नमोंतेन स्वरूपं प्रवि
न्यसेत्॥ श्री अं नमो मातृकान्यासं पूर्णमस्तु॥ अस्य श्री बहिर्मातृकासरस्व

त्रिमहाराजमहासंत्रस्य ब्रह्माविष्णुमहेश्वर ऋषयः॥ गायत्री छंदः॥ श्रीव
१२६ हिर्मातृकासरस्वति देवता॥ हलौ बीजानि॥ स्वराः शक्तयः॥ बिंदवः कीलकं॥
श्रीबहिर्मातृकासरस्वति प्रसादसिध्यर्थं न्यासे विनियोगः॥ ॐ अं कं खं गं
घं ङं आं अंगुष्ठाभ्यां नमः॥ इं चं छं जं झं ञं ईं तर्जनीभ्यां नमः॥ ॐ उं टं ठं
डं ढं णं ऊं मध्यमाभ्यां नमः॥ एं ॐ तं थं दं धं नं ऐं अनामिकाभ्यां नमः॥ ॐ
ओं पं फं बं भं औं कनिष्ठिकाभ्यां नमः॥ ॐ अं यं रं लं वं शं षं सं हं ळं क्षं अः क
रतलपृष्ठाभ्यां नमः॥ एवं हृदयादि॥ भूर्भुवः स्वरोमिति दिग्बंधः॥ अथ १२६

नामिकाभ्यां नमः॥ ॐ ओं पं फं बं भं मं औं कनिष्ठिकाभ्यां नमः॥ ॐ अं यं
रं लं वं शं षं सं हं ळं क्षं अः करतलपृष्ठाभ्यां नमः॥ एवं हृदयादि॥ ॐ अं कं
खं गं घं ङं आं हृदयाय नमः॥ ॐ इं चं छं जं झं ञं ईं शिरसे स्वाहा॥ ॐ
उं टं ठं डं ढं णं ऊं शिखायै वषट्॥ ॐ एं तं थं दं धं नं ऐं कवचाय हुं॥ ॐ ओं पं
फं बं भं मं औं नेत्रत्रयाय वौषट्॥ ॐ यं रं लं वं शं षं सं हं ळं क्षं अं अः अ
स्त्राय फट्॥ भूर्भुवस्स्वरोमिति दिग्बंधः॥ अथ ध्यानं॥ बंधूककांति
नेत्रां पृथुतरलदिलसघुक्लिमदङ्कवक्षंपीनोत्तुंगप्रष्ठकुस्तनजघना

१२७ तपंक्षेः॥ अंनमः शिरसि॥ आंनमः जिह्वां॥ कंनमः वामबाहुमू
ले॥ खंनमः कोणे॥ गंनमः मणिबंधे॥ घंनमः करांगुलिमूले॥ ङंनमः अं
गुल्यग्रे॥ चंनमः दक्षिणबाहुमूले॥ छंनमः कूर्परे॥ जंनमः मणिबंधे॥
झंनमः अंगुलिमूले॥ ञंनमः अंगुल्यग्रे॥ टंनमः दक्षोरुमूले॥ ठंनमः
जानुनी॥ डंनमः गुल्फे॥ ढंनमः पादांगुलिमूले॥ णंनमः पादांगुल्य
ग्रे॥ तंवामोरुमूले॥ थंनमः जानुनी॥ दंनमः गुल्फे॥ धंनमः पादांगु १२७
लिमूले॥ नंनमः पादांगुल्यग्रे॥ पंनमः दक्षिणपार्श्वे॥ फंनमः वा

मपार्श्वे॥ बंनमः पृष्ठे॥ भंनमः नाभौ॥ मंनमः जठरे॥ यंनमः हृ
दये॥ रंनमः दक्षिणकुक्षौ॥ लंनमः वामकुक्षौ॥ वंनमः अपरगले॥
शंदक्षिणहस्ते॥ षंनमः वामहस्ते॥ संनमः दक्षिणपादयोः॥ हंनमः
वामपादयोः॥ ळंनमः गलकूपे॥ क्षंनमः सर्वांगेव्यापकं कुर्यात्॥ इ
तिबहिर्मातृकान्यासंपूर्णम्॥ भूशुद्धिभूतशुद्धिप्राणप्रतिष्ठा अंतर्मा
तृकाबहिर्मातृकापंचप्रयोगान्कृत्वा॥ तथाकलशपूजनं॥ ज
लमध्येवरुणंआवाह्यउपचारैः जलंसंपूज्य॥ कलशस्येति

सू०

भ०

१३८

प्रार्थना॥ ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि ते रवे॥ तेन सत्येन मे देव
तीर्थं देहि दिवाकर॥१४॥ अंकुशमुद्रया तीर्थान्याकृष्य॥ गरुडमुद्रया
निर्विषीकृत्य॥ धेनुमुद्रयामृतीकृत्य॥ चक्रमुद्रया संरक्ष्य॥ उघं
न घेति त्रिकवचे नाभिमंत्र्य॥ सोदकेन पाणिना अंगान्यभिमृश्य॥
वरुणकलशं पूजयेत्॥ ॐ कलशस्य मुखे विष्णुः कलशांतु समा
श्रिताः॥ अत्र गायत्री सावित्री शांतिः पुष्टीकरी तथा॥ आयांतु देव
पूजार्थं दुरितक्षयकारकाः॥ गंगे च यमुने चैव गोदावरि सरस्वति॥ १३८

कं:

राम

ध्यानं॥ पंचाशल्लिर्णभेदैर्विहितवदनदोःपादयोः कुक्षिवक्षोदेशां भास्वत्क
पर्दीकलितशशिकलामिंदुकुंदावदातां॥ अक्षस्रक्कुंभचिन्हामभय
करवरं यक्षणः पद्मसंस्थामच्छाकल्पामतुच्छस्तनजघनभरां भार
तीं तां नमामि॥ १२॥ अं नमः ललाटे॥ आं नमः मुखवृत्ते॥ इं दक्षिण
नेत्रे॥ ईं नमः वामनेत्रे॥ उं नमः दक्षिणश्रोत्रे॥ ऊं नमः वामश्रोत्रे॥ ऋं
नासापुटे॥ ॠं नमः नासापुटे॥ लृं नमः गंडे॥ लॄं नमः गंडे॥ एं ऊर्ध्वो
ष्ठे॥ ऐं नमः अधरोष्ठे॥ ओं नमः ऊर्ध्वदंतपंक्तिषु॥ औं नमः अधोदं

नर्मदासिंधुकावेरी जलेस्मिन्संनिधिंकुरु ॥१७॥ वरुणाय
नमः वरुणंआवाहयामि ॥ वरुणाय नमः सर्वोपचारानूसम
र्पयामि ॥ श्रीसविता सूर्यनारायण प्रीत्यर्थे अर्घ्यप्रधानांगंन्या
सेविनियोगः ॥ ॐ त्रिकचस्यकलसस्यपुत्रस्यप्रस्कण्वऋषिः
सूर्योदेवता ॥ अनुष्टुप्छंदः ॥ अर्घ्यदाननमस्कारांगंन्यासे
विनियोगः ॥ ॐ ह्रोंधंनधमित्रमहः मित्रायनमः दक्षिण
हस्ते ॥ ॐ ह्रीं आरोहंनुत्तरांदिवं ॥ रवयेनमः ॥ वामहस्ते ॥

सू०

ॐ ह्रुं हं सः हंसो गंमस्य स्सूर्यस्सूर्याय नमः हृदि ॥ ॐ ह्रैं हरिमाणं च नाशाय

१३९ भानुवे नमः मूर्ध्नि ॥ ह्रौं शुकेषु मे हरिमाणं रस्वमाय नमः दक्षि

ण पादे ॥ ॐ ह्रः रोपणाकासु दध्मासि पूष्णे नमः वाम पादे ॥ ॐ ह्रां

अथो हारिद्रवेषु मे हिरण्यगर्भाय नमः नाभौ ॥ ॐ ह्रीं हरिमाणं

नि दध्मसि मरीचये नमः जिव्हायां ॥ ॐ ह्रूं उदगादयमादित्यः आ

दित्याय नमः दक्षिण नेत्रे ॥ ॐ ह्रैं विश्वेन सहसा सह ॥ सवित्रे नमः १३९

वाम नेत्रे ॥ ॐ ह्रौं द्विषंतं मह्यं रंधयन्नर्काय नमः कवचाय हुं ॥

सू०

ॐ ह्रः मोऽहं द्विषते रध्यं भास्कराय नमः अस्त्राय फट्॥ ॐ ह्रां
उद्यंनद्यमित्रमहः दक्षिणहस्ताय नमः॥ ॐ ह्रीं आरोहन्नुत्तरांदिवं
वामहस्ताय नमः॥ ॐ विहिताकरुणाईवीररक्षतु मां॥ कुरुकुना
भिमित्रो रक्षतु मां॥ ह्रूं हृद्रोगं मम सूर्य॥ हृदयाय नमः॥ सूर्ये ऽस्ताना
ईक्षास्त्व नामयं करोतु मां॥ ह्रैं हरिमाणं च नाशाय त्रिशिरसे नमः॥ भा
नुः सर्वभूतेभ्यो रक्षतु मां॥ ॐ ह्रौं रोपणाकासु दध्मसि धाम चरणा
य नमः॥ विहितागमनास्त्रपा रक्षतु मां॥ ॐ ह्रः अथो हारिद्रवे

सू०

१५० सुमेनाभ्यैनमः॥ नमो ज्या उवाद्धिरण्यगर्भो रक्षतु मां॥ ॐ ह्रां

उद्गाहयमादित्यः दक्षिणनेत्राय नमः॥ प्रतिपिद्धेक्षणादादित्यो

रक्षतु मां॥ मुखाय नमः॥ प्रतिपिद्धिजिकाव्यातो दात्सर्वतोमख

चिरक्षतु मां॥ ॐ ह्रीं विश्वेनत्सहस्रासहषामनेत्राय॥ विहिताक

रणा सविता रक्षतु मां॥ हूं द्विषंतंमह्यं रंधय नू कुवचायहूं॥ त्वम्नो

माण्यकैरिक्षतु मां॥ हैं मोऽअहं द्विषंते रधं अस्वायफद्दरॐ॥ दिव्देव १५०

ताभास्करो रक्षतु मां॥ ॐ ह्रां ह्रीं उद्यन घमित्रमहआरोहतु

करपृष्ठाभ्यां नमः॥ एवं हृदयादि॥ ॐ ह्रां ह्रीं उद्यन्नद्य मित्रमह आ
१४१ रोहन्नुत्तरां दिवं॥ मित्र रवये हृदयाय नमः॥ ॐ ह्रूं ह्रैं हृद्रोगं मम सूर्य ह
रिमाणं च नाशय॥ सूर्य भानु शिरसे स्वाहा॥ ॐ ह्रौं ह्रः शुकेषु मे
हरिमाणं रोपणाकासु दध्मसि॥ खग पूष्णे शिखायै वषट्॥ ॐ ह्रां
ह्रीं अथो हारिद्रवेषु मे हरिमाणं नि दध्मसि॥ हिरण्यगर्भ मरीचि
कवचाय हुं॥ ॐ ह्रूं ह्रैं उदगादयमादित्यो विश्वेन सहसा सह॥ आ
दित्य सवित्रे नेत्रत्रयाय वौषट्॥ ॐ ह्रौं ह्रः द्विषंतं मह्यं रंधयन्मो १४१

अहं द्विषते रधं॥ अर्क भास्कराय अस्त्राय फट्॥ भूर्भुवस्वः॥ जले
वापि स्थले वापि पममष्टदलं लिखेत्॥ मध्ये वर्तुलं षट्कोणं च त्रि
कोणं बिंदुना॥ १०॥ अष्टकोणांतरं वृत्तं द्वादशांगदलं च तत्कं॥ चतु
र्द्वारं सूर्ययंत्रं एवंविधिः प्रकल्पयेत्॥ ११॥ जले च तदा वक्ष्यमाणं
सर्वकार्यं॥ स्थले च तदा पीठे वा महापात्रे वा ताम्रपात्रं संस्थाप्य
तत्र रक्तचंदन यथोक्तं पद्मं कृत्वा॥ तस्यांतरतो दशपीठदेवता
पूज्याः॥ ॐ आधारकूर्माय नमः आवाहयामि पूजयामि॥ ॐ

शेषायनमःशेषंआवाहयामिपूजयामि॥ॐपृथिव्यैनमःपृथि
१६२ वींआवाहयामिपूजयामि॥स्कंदायनमःस्कंदंआवाहयामिपू
जयामि॥नलायनमःनलंआवाहयामिपूजयामि॥पद्मायनमः
पद्मंआवाहयामिपूजयामि॥पत्रेभ्योनमःपत्रंआवाहयामि
पूजयामि॥कर्णिकेभ्योनमःकर्णिकंआवाहयामिपूजयामि॥
केसरेभ्योनमःकेसरंआवाहयामिपूजयामि॥ॐअथांतर्या
गउद्दानस्वरस्नानस्तोत्रस्वरूपश्रीसूर्यचरणकमलभक्तिसि १६२

न्तरांदिव्यंमित्ररविभ्योनमःअंगुष्ठाभ्यांनमः॥ॐह्रूंह्रैंहृद्रोगं
ममसूर्यहरिमाणंचनाशयतर्जनीभ्यांनमः॥ह्रौंह्रःशुकेषुमेह
रिमाणंरोपणाकासुदध्मसिखगपृष्ठमध्यमाभ्यांनमः॥ॐ
ह्रांह्रींअथोहारिद्रवेषुमेहरिमाणंनिदध्मसिहिरण्यगर्भमरी
चयेअनामिकाभ्यांनमः॥ॐह्रूंह्रैंउदगादयमादित्योविश्वेन
सहसासह॥आदित्यसवितर्कनिष्ठिकाभ्यांनमः॥ॐह्रौंह्रः
द्विषंतंमह्यंरंधयन्मोऽअहंद्विषतेरधंअर्कभास्करायकरतल

सू० अ०

पूजा॥ गंधपुष्पैः ॐ नमोस्तुनारायणायेति॥ केचित्तुमंडलपूजानं
१४२ तरंअंतर्यागात्मपूजा॥ तत्रअष्टदलमध्येपूर्वे॥ ॐमार्त्तंडायनम
ः॥१॥ ॐअग्नयेनमः॥२॥ ॐभानवेनमः॥३॥ दक्षिणे॥ ॐआ
दित्यायनमः॥४॥ नैरृत्ये॥ हंसायनमः॥५॥ पश्चिमे॥ ॐसूर्याय
नमः॥६॥ वायवे॥ ॐदिवाकरायनमः॥ उत्तरे॥ ॐ तपनायनमः
॥८॥ ईशान्ये॥ भास्करायनमः॥९॥ पद्ममध्येवर्त्तमानमासा
धिपायनमः॥१०॥ इतिप्रथमावरणं॥ तद्बहिःपूर्वादिदिक्षु॥ १४२

ॐआदित्यायनमःआ०पूजयामि॥ ॐसवित्रेनमः पूजयामि॥
सूर्यायनमःपूजयामि॥ ॐखगायनमःपूजयामि॥ ॐपूष्णेनमः
पूजयामि॥ ॐभगस्तिमतेनमःपूजयामि॥ ॐमार्त्तंडायनमःपूज
यामि॥ जगतांचक्षुषेनमःपूजयामि॥८॥ इतिद्वितीयावरणं॥ त
द्बहिःपूर्वादि॥ ॐभास्करायनमःपूजयामि॥ ॐतपनायनमः
पूजयामि॥ रवयेनमःपूजयामि॥ पूष्णेनमःपूजयामि॥ ॐमार्त्तं
डायनमःपूजयामि॥ ॐअर्कायनमःपूजयामि॥ ॐजगन्नाथाय

१६६ नमः पूजयामि॥ ॐ आदित्याय नमः पूजयामि॥ इति तृतीयावरणं
॥३॥ सर्वेषां अभ्यंतरे पूर्वादि॥ दीप्तायै नमः पूजयामि॥ ॐ भद्रायै
नमः पूजयामि॥ विभूत्यै नमः पूजयामि॥ विमलायै नमः पूजयामि
ॐ अमोघायै नमः पूजयामि॥ विद्युतायै नमः पूजयामि॥ ॐ मध्ये
नमः पूजयामि॥ ॐ श्रियै नमः पूजयामि॥ श्रियंनर्वतोमुखीमात्त
काभ्यां नमः पूजयामि॥ अरुणसारथये नमः पूजयामि॥ सप्ततुर १६६
गेभ्यो नमः पूजयामि॥ द्वारे॥ ॐ दंड्यै नमः पूजयामि॥ पिंगल

ध्यर्थं परमात्मस्वरूपं श्री सावित्री सूर्यनारायणप्रीत्यर्थं अंतर्या
गं करिष्ये॥ ॐ ब्रह्मकंदं समुद्भूतं ज्ञाननालं सुशोभितं॥ ऐश्वर्या
ष्टदलोपेतं परं वैराग्यकारकं॥१॥ हृत्कमलं विचिंत्य॥ हिरण्य
येन पात्रेण सत्यस्यापिहितं मुखं यो सावादित्यः पुरुषः सोसा
वहं॥ अहमादित्योहं सूर्योहं॥ सूर्य आत्मा जगतस्तस्थुषश्च
सौवर्णेन सोपानेन मार्गेण अवतीर्य॥ सहस्रपुरुषादित्यः॥
सहस्रकिरणो रविः॥ सहस्रशीर्षेति सूक्तं पठेत्॥ अथ आत्म

आदित्यायनमः आदित्यंआवाहयामिपूज०॥९॥ॐसवि
१४५ त्रेनमः सवित्रंआवाहयामिपू०॥१०॥ॐअर्कायनमः अर्कं
आवाहयामिपू०॥११॥ॐभास्करायनमः भास्करंआवाहया
मिपूजयामि॥१२॥ॐइतिपंचमावरणं॥५॥तद्बहिः पूर्वादि॥
ॐइंद्रायनमः इंद्रंआवाहयामिपू०॥१॥ॐआग्नयेनमः अ
ग्निमावाहयामि॥२॥ॐयमायनमः यमंआवाहयामिपू०॥३ १४५
निर्ऋतेनमः निर्ऋतिंआवाहयामिपू०॥४॥ॐवरुणायनमः व

रुणंआवाहयामिपू०॥ॐवायवेनमः वायुंआवाहयामिपू०॥६
ॐ सोमायनमः सोमंआवाहयामिपूजयामि॥७॥ॐईशानाय
नमः ईशानंआवाहयामिपू०॥८॥इतिषष्ठमावरणं॥६॥तद्ब
हिः पूर्वदिशो॥ॐसप्तसागरेभ्योनमः सप्तसागरंआवाहया
मिपूजयामि॥१॥ॐसप्तपर्वतेभ्योनमः सप्तपर्वतंआवाहया
मिपू०॥२॥ॐसप्तऋषिभ्योनमः सप्तऋषींआवाहयामिपू
॥३॥ॐसप्तद्वीपायनमः सप्तद्वीपंआवाहयामिपूजयामि

सू०

ॐ वसुंधरायैनमः वसुंधरांआवाहयामिपूजयामि ॥ ॐ सप्त

१४६ मातृभ्योनमः सप्तमातॄंआवावाहयामिपूजयामि ॥ इतिसप्तमा

वरणं ॥७॥ एकादशरुद्रेभ्योनमः एकादशरुद्रंआवाहयामिपू० इतिअष्टमा

अथपूर्वद्वारे ॥ ॐ द्वारश्रियैनमः द्वारश्रियांआवाहयामिपू० ॥ वरणं ॥८

भद्रायैनमः भद्रांआवाहयामि ॥ ॐ सुभद्रायैनमः सुभद्रांआ

वाहयामिपू० ॥ इतिनवमावरणं ॥ ॐ दक्षिणेद्वारश्रियैद्वारश्रि १४६

यांआवाहयामिपूजयामि ॥ ॐ जयायैनमः जयांआवाहया

यैनमः पूजयामि ॥ ॐ द्वारपालायनमः पूजयामि ॥ इतिचतुर्था

वरणं ॥४॥ अथद्वादशदलेषुमित्रादिनावाहयामि ॥ ॐ मित्राय

नमः मित्रंआवाहयामि ॥ ॐ रवयेनमः रविंआवाहयामि ॥ सूर्या

यनमः सूर्यंआवाहयामि ॥३॥ ॐ भानवेनमः भानुंआवाहया

मि ॥४॥ ॐ खगायनमः खगंआवाहयामि ॥५॥ ॐ पूष्णेनमः

पूषणंआवाहयामि ॥६॥ ॐ हिरण्यगर्भायनमः हिरण्यगर्भंआ

वाहयामि ॥७॥ ॐ मरीचयेनमः मरीचिंआवाहयामि ॥८॥ ॐ

मिपूज०॥ ॐ विजयायै नमः विजयां आवाहयामि पू०॥ ॐ इति
पश्चिमे॥ ॐ द्वारश्रियै नमः द्वारश्रियं आवाहयामि पू०॥ ब
लाय नमः बलं आवाहयामि पूज०॥ ॐ प्रबलाय नमः प्रबलं
आवाहयामि पूज०॥ इति उत्तरे॥ ॐ द्वारश्रीयै नमः द्वारश्रि
यं आवाहयामि पूजया॥ ॐ जयायै नमः जयां आवाहया
मि पूजयामि॥ ॐ विजयायै नमः विजयां आवाहयामि पूज०
इति द्वारकोणेषु॥ ॐ धर्माय नमः धर्मं आवाहयामि पू०॥ सा

स्० अ०

नायनमः ज्ञानं आवाहयामि पू०॥ वैराग्यायनमः वैराग्यंआ
१५७ वाहयामि पूज॥ ॐ ऐश्वर्यायनमः ऐश्वर्यंआवाहयामि पू०॥ वि
दिक्षु॥ ॐ अधर्मायनमः अधर्मंआवाहयामि पू०॥ ॐ अज्ञाना
यनमः अज्ञानंआवाहयामि पू०॥ ॐ अवैराग्यायनमः अवै
राग्यंआवाहयामि पू०॥ ॐ अनैश्वर्यायनमः अनैश्वर्यंआवा
हयामि पू०॥ ॐ ह्रां प्रेक्त्यात्मने रजसे नमः आवाहयामि १५७
ॐ मध्यप्रसत्यात्मने सत्वायनमः आवाहयामि॥ ॐ आवाह

ॐ आत्ममंडलाय नमः आवाहयामि पू०॥ ॐ सोम मंडलाय नमः
आवाहयामि पू०॥ ॐ नमो भगवते सर्वाभरणसंपन्नाय त्रिगुणा
त्मधारिणे श्री सविता सूर्य नारायणाय सांगाय सपरिवाराय सा
युधाय सशक्तिकाय सवाहनाय नमः आवाहयामि पूजयामि
एही सूर्य सहस्रांशो तेजोराशि जगत्पते॥ अनुकंपा हि मां भक्त्या
गृहाणार्घ्यं नमोस्तुते॥ २०॥ ॐ सूर्यनारायणाय नमः प्रसंनार्घ्यं
समर्पयामि॥ सर्वाभरण पीठदेवतासहित श्री सावित्री सूर्यनारा

१५८ यणइहागछइहातिष्ठ॥ ॐ भूर्भुवस्वःकारोंमूर्तिस्सूर्यमंडलादा
गस्यहृदयस्थानभाविनस्सूर्यमावाहनीमुद्रयापीठमध्येआवाहया
मि॥ पुष्पांजलिंदत्वा॥ अथध्यानं॥ ॐ पद्मासनःपद्मकरःपद्मग
र्भसमद्युतिः॥ सप्ताश्वरथसंयुक्तोद्विभुजःस्यात्सदारविः॥२१॥
अरुणंचसरोहेमद्युतिकुंडलभूषणं॥ तेजोराशिश्रियायुक्तंतप्त
कांचनसंनिभं॥२॥ किरीटिनंपद्मनेत्रंपद्मरागविभूषितं॥ सिंदूरारु १५८
णमीशानंवामार्घ्यदयितंरविं॥२३॥ पाशांकुशधरंदेवंसाक्षस्सूत्र

१५१ प्रदर्शयेत्॥ आवाहनींमुद्रेणआवाहयेत्॥ स्थापनीमुद्रेणस्थाप
नं॥ संनिधापनीं॥ संनिरोधनीं॥ सन्मुखीकरणीं॥ प्रार्थनीं॥ इति
षड्मुद्रांदर्शयित्वा॥ अथपुरुषसूक्तेनऋचेनआवाहनादिषोडशो
पचारैःसंपूज्य॥ तथा॥ ॐ सहस्रशीर्षापुरुषःसहस्राक्षःसह
स्रपात्॥ सभूमींविश्वतोवृत्वात्यतिष्ठद्दशांगुलं॥१॥ श्रीसवितासू
र्यनारायणायनमःआवाहनंसमर्पयामि॥ ॐ पुरुषएवेदंसर्वंयद्भू १५१
तंयच्चभव्यं॥ उतामृतत्वस्येशानोयदन्नेनातिरोहति॥२॥ श्रीसू

र्यसावित्रीदेवताभ्योनमःआसनंस०॥ ॐ एतावानस्यमहिमा
तोज्यायांश्चपूरुषः॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि
॥३॥ श्रीसूर्यसावित्रीदेवताभ्योनमःपाद्यंस०॥ ॐ त्रिपादूर्ध्वउदै
त्पुरुषःपादोस्येहाभवत्पुनः॥ ततोविष्वङ्व्यक्रामत्साशनानशने
अभि॥४॥ श्रीसूर्यसा०अर्घ्यंस०॥ ॐ तस्माद्विराळजायतविरा
जोअधिपुरुषः॥ सजातोअत्यरिच्यतपश्चाद्भूमिमथोपुरः॥
॥५॥ श्रीसूर्यसावित्रीदेवताभ्योनमःआचमनीयंस०॥ यत्पुरुषं

सू० ७०

१५० व्यदधुः कतिधा व्यकल्पयन्॥ मुखंकिमस्यकौबाहूकाऊरूपादाउ
च्येते॥६॥ आप्यायस्वसमेतुतेविश्वतः सोमवृष्ण्यं॥ भवावाजस्य
संगथे॥ ॐ दधिक्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनः॥ सुर
भिनोमुखाकरत्प्रणआयूंषितारिषत्॥ घृतंमिमिक्षेघृतमस्य
योनिर्घृतेश्रितोघृतम्वस्यधाम॥ अनुष्वधमावहमादयस्वस्वा
हाकृतंवृषभवक्षिहव्यं॥ ॐ मधुवाताऋतायतेमधुक्षरंतिसिं
धवः॥ माध्वीर्नःसंत्वोषधीः॥ मधुनक्तमुतोषसोमधुमत्पार्थि १५०

राम

कमंडलुं॥ प्रसन्नवदनंशांतंद्विनेत्रंकमलासनं॥२४॥ अष्टबाहुंद्वि
षट्कोणं[illegible]पिंपमस्थंरविमंडले॥ द्विपद्मस्थमुदारांतंस्मरेत्त्वंहृदयेहृ
र्युतं॥२५॥ ॐ ध्येयः सदासवितृमंडलमध्यवर्तीनारायणःसर
सिजासनसंनिविष्टः॥ केयूरवान्मकरकुंडलवान्किरीटीहारी
हिरण्मयवपुर्धृतशंखचक्रः॥६॥ सशंखचक्रंरविमंडलस्थि
तंकुशेशयाक्रांतमनंतमच्युतं॥ भजामिबुध्यातपनीयमुत्तमं
सुरोत्तमंचित्रविभूषणोज्वलं॥७॥ इतिध्यात्वा॥ अथषण्मुद्रां

॥७॥ ॐ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे ॥ छंदां
१५१ ~~सि जज्ञिरे~~ तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यं ॥ पशूंस्तांश्चक्रे वा
यव्यानारण्यान्ग्राम्याश्च ये ॥८॥ श्री सू० यज्ञोपवीतं स० ॥ ॐ त
स्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे ॥ छंदांसि जज्ञिरे तस्मा
द्यस्माज्जाताऽजावयः ॥९॥ श्रीसूर्यसावित्रीदेवताभ्यां नमः
गंधं स० ॥ ॐ तस्मादश्वाऽअजायंत ये के चोभयादतः ॥ गावो ह ज
ज्ञिरे तस्मात्तज्जाताऽअजावयः ॥१०॥ श्रीसविता सूर्यं० पुष्पाणि १५१

ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ॥ मुखं किमस्य कौ बाहू
का ऊरू पादा उच्येते ॥११॥ श्री सावित्र्यै नमः सौभाग्यद्रव्यं स० ॥ श्री
सूर्यसावित्रीदेवताभ्यां धूपं स० ॥ ॐ ब्राह्मणोस्य मुखमासीद्बा
हू राजन्यः कृतः ॥ ऊरु तदस्य वैश्यः पद्भ्यां शूद्रोऽअजायत ॥१२॥
श्रीसूर्यसावित्रीदेवताभ्यो नमः दीपं स० ॥ चंद्रमा मनसो जात
श्चक्षोः सूर्योऽअजायत ॥ मुखादिंद्रश्चाग्निश्च प्राणाद्वायुरजाय
त ॥१३॥ श्रीसूर्यसावित्रीदेवताभ्यो नमः नैवेद्यं स० ॥ ॐ नाभ्या

आसीदंतरिक्षंशीर्ष्णोद्यौःसमवर्तत॥पद्भ्यांभूमिर्दिशःश्रोत्रात्तथा
१५२ लोकाँअकल्पयन्॥श्रीसूर्यसावित्रीदेवताभ्योनमःपूगीफलतांबूलं॥
ॐसप्तास्यासन्परिधयस्त्रिःसप्तसमिधःकृताः॥देवायद्यज्ञंतन्वा
नाअबध्नन्पुरुषंपशुं॥१५॥श्रीसूर्यसावित्रीदेवताभ्योनमःदक्षिणांसं॰
ॐयज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन्॥तेहनाकं
महिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः॥१६॥श्रीसूर्यसावित्री
देवताभ्योनमःमंत्रपुष्पांजलिंसमर्पयामि॥ॐभास्करायविद्महे १५२

वंरजः॥मधुद्यौरस्तुनःपिता॥मधुमान्नोवनस्पतिर्मधुमाँअस्तु
सूर्यः॥माध्वीर्गावोभवंतुनः॥ॐस्वादुःपवस्वदिव्यायजन्मनेस्वा
दुरिंद्रायसुहवीतुनाम्ने॥स्वादुर्मित्रायवरुणायवायवेबृहस्प
तयेमधुमाँअदाभ्यः॥श्रीसूर्यसावित्रीदेवताभ्योनमःपंचा
मृतस्नानंस॰॥ॐउद्यंनयेतित्रिऋचेनशुद्धोदकस्नानंस॰॥
तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः॥तेनदेवाअयजंतसा
ध्याऋषयश्चये॥श्रीसूर्यसावित्रीदेवताभ्योनमःवस्त्रंस॰॥

गंममस्सूर्यसूर्यायनमः इदमर्घ्यंस०॥३॥ ॐ ह्रैं हरिमाणंचनाशायभानु
१५२ वेनमः इदमर्घ्यंस०॥४॥ ॐ ह्रौं शुकेषुमेहरिमाणंखगायनमः इदम
र्घ्यंस०॥५॥ ॐ ह्रः रोपणाकासुदध्मसिपूष्णेनमः इदमर्घ्यंस०॥६॥
ॐ ह्रां अथोहारिद्रवेषुमेहिरण्यगर्भायनमः इदमर्घ्यंस०॥७॥ ॐ ह्रीं
हरिमाणंनिदध्मसिमरीचयेनमः इदमर्घ्यंस०॥८॥ ॐ ह्रूं उदगादयमा
दित्यः आदित्यानमः इदमर्घ्यं०॥९॥ ॐ ह्रैं विश्वेनसहसासहस्रवित्र
भ्योनमः इदमर्घ्यंस०॥१०॥ ॐ ह्रौं द्विषंतंमह्यंरंधयन्नोअर्कायनमः इ १५३

दमर्घ्यंस०॥११॥ ॐ ह्रः मोअहंद्विषतेरधंभास्करायनमः इदमर्घ्यंस०
॥१२॥ ॐ ह्रां ह्रीं उद्यंनद्यमित्रमहआरोहन्नुत्तरांदिवंमित्ररविभ्योन
मः इदमर्घ्यंस०॥१३॥ ॐ ह्रूं ह्रैं ह्रः ह्रौं गंममस्सूर्यहरिमाणंचनाशायसू
र्यभानुभ्योनमः इदमर्घ्यंस०॥१४॥ ॐ ह्रौं ह्रः शुकेषुमेहरिमाणंरोप
णाकासुदध्मसि॥खगपूष्णेनमः इदमर्घ्यंस०॥१५॥ ॐ ह्रां ह्रीं अथो
हारिद्रवेषुमेहरिमाणंनिदध्मसिहिरण्यगर्भमरीचयेनमः इदम
र्घ्यंस०॥१६॥ ॐ ह्रूं ह्रैं उदगादयमादित्यो विश्वेनसहसासहआदि

११४ त्यसवितृभ्योनमः॥१७॥ॐ ह्रौं ह्रः द्विषंतंमह्यंरंधयन्मोअहंद्विषतेरधंभ
र्कभास्करेभ्योनमः॥१८॥ॐ ह्रां ह्रीं ह्रूं ह्रैं उद्यंनद्यमित्रमहआरोहन्नुत्तरां
दिवं॥ हृद्रोगंममसूर्यहरिमाणंचनाशय॥ मित्ररविसूर्यभानुभ्योनमः इद
मर्घ्यंस०॥१९॥ॐ ह्रौं ह्रः ह्रां ह्रीं शुकेषुमेहरिमाणंरोपणाकासुदध्मसि
अथोहारिद्रवेषुमेहरिमाणंनिदध्मसि॥ खगपूष्णहिरण्यगर्भमरीच
येनमः इदमर्घ्यंस०॥२०॥ॐ ह्रूं ह्रैं ह्रौं ह्रः उदगादयमादित्योविश्वेनसह ११४
सासहा॥ द्विषंतंमह्यंरंधयन्मोअहंद्विषतेरधं॥ आदित्यसवित्रार्कभा

महद्युतिकरायधीमहि॥ तन्नोआदित्यःप्रचोदयात्॥ इतिप्रार्थना॥
ॐ ऐं ह्रीं श्रीं घृणिःसूर्यआदित्योम्॥ इतिद्वादशवारंमूलमंत्रंजपि
त्वा॥ अथार्घ्यप्रदानं॥ ताम्रेपात्रेअष्टदलंलिखित्वारक्तचंदनेनमा
दायजानुमवनींगतोरक्तैरापूर्यरक्तचंदनरक्तपुष्परक्ततंदुलदूर्वा
यवान्तिलान्अर्घ्यपात्रेनिक्षिप्यनासिकाग्रमवलोकयन्॥ अथअ
र्घ्यंदद्यात्॥ ॐ ह्रां उद्यंनद्यमित्रमहः मित्रायनमः इदमर्घ्यंसमर्पयामि
॥१॥ ॐ ह्रीं आरोहन्नुत्तरांदिवंरवयेनमः इदमर्घ्यंस०॥२॥ ॐ ह्रूं हृद्रो

रातिरर्घ्याणि दत्वा ॥ एवं प्रत्यहं द्वादशावृत्तिं कृत्वा उन्नमस्कृत्यः प्रत्यहाद्वि
१५५ गुणं रविवारं ॥ पुनः पंचोपचारैः संपूज्य ॥ पूर्वोक्तं षडंगन्यासं कुर्यात् ॥ त
तोर्घ्योदकं गृहीत्वा त्रिःकृत्वा चैनं प्राश्नीयात् ॥ ॐ यज्ञेन यज्ञमयजंत० ॥१॥ ॐ
विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतो बाहुरुत विश्वतस्पात् ॥ सं बाहुभ्यां
धमति संपतत्रैर्द्यावाभूमी जनयन्देव एकः ॥१॥ इति पुष्पांजलिं समर्पयेत्
ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ॥ हिरण्ययेन स
विता रथेना देवो याति भुवनानि पश्यन् ॥१॥ इति स्तुत्वा ॥ ॐ सविता पश्चा १५५

तात्सविता पुरस्तात्सवितोत्तरात्तात्सविताधरात्तात् ॥ सविता नः सुवतु सर्व
तातिं सविता नो रासतां दीर्घमायुः ॥१॥ इति प्रार्थयेत् ॥ उद्यंनद्येति त्रिःकृत्वा जप
ठित्वा ॥ रविवारे द्वादश ब्राह्मणान् भोजयेत् ॥ यथाशक्ति दक्षिणां दत्वा ॥ तथा
च नमस्कारविधिः ॥ ॐ ह्रां उद्यंनद्य मित्रमहः मित्राय नमः ॥१॥ ॐ ह्रीं आरो
हन्नुत्तरां दिवं रवये नमः ॥२॥ ॐ ह्रूं हृद्रोगं मम सूर्य सूर्याय नमः ॥३॥ ॐ ह्रैं ह
रिमाणं च नाशय ॥ भानवे नमः ॥४॥ ॐ ह्रौं शुकेषु मे हरिमाणं खगाय नमः ५
ॐ ह्रः रोपणाकासु दध्मसि पूष्णे नमः ॥६॥ ॐ ह्रां अथो हारिद्रवेषु मे हरि

ण्यगर्भाय नमः॥७॥ ॐ ह्रीं हरिमाणं निदध्मसि मरीचये नमः॥८॥
११६ ॐ ह्रूं उदगादयमादित्यः आदित्याय नमः॥९॥ ॐ ह्रैं विश्वेन सहसा
सह॥ सवितृभ्यो नमः॥१०॥ ॐ ह्रौं द्विषंतं मह्यं रंधयन् अर्काय नम
ः॥११॥ ॐ ह्रः मो अहं द्विषते रधं॥ भास्कराय नमः॥१२॥ ॐ ह्रां ह्रीं
उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवं मित्ररविभ्यो नमः॥१३॥ ॐ ह्रूं
ह्रैं हृद्रोगं मम सूर्य हरिमाणं च नाशय सूर्यभानुभ्यो नमः॥१४॥ ॐ ११६
ह्रौं ह्रः शुकेषु मे हरिमाणं रोपणाकासु दध्मसि खगपूष्णभ्यां नमः॥१५

स्करेभ्यो नमः इदमर्घ्यं स०॥२१॥ ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः उद्यन्नद्य मित्रम
ह आरोहन्नुत्तरां दिवं॥ हृद्रोगं मम सूर्य हरिमाणं च नाशय॥ शुकेषु
मे हरिमाणं रोपणाकासु दध्मसि॥ अथो हारिद्रवेषु मे हरिमाणं निद
ध्मसि॥ उदगादयमादित्यो विश्वेन सहसा सह॥ द्विषंतं मह्यं रंधय
न्मो अहं द्विषते रधं॥ मित्ररविसूर्यभानुखगपूष्णहिरण्यगर्भम
रीच्यादित्यसवित्रर्कभास्कराय नमः इदमर्घ्यं स०॥२२॥ ए
वं प्रकारेण त्रिवारं त्रिकृच्चेनार्घ्यत्रयं दत्वा॥२३॥२४॥ एवं चतुर्वे

सू०

१५७ छ॥हिरण्यगर्भमरीचयेनमः॥२०॥ॐ हूं हैं हौं हः उद्गादयमादित्योवि
श्वेनसहसासह॥द्विषंतंमह्यंरंधयन्मोअहंद्विषतेरधं॥आदित्यसवि
त्रार्कभास्करेभ्योनमः॥२१॥ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः उद्यंनद्यमित्रमह
आरोहन्नुत्तरांदिवं॥हृद्रोगंममसूर्यहरिमाणंचनाशय॥शुकेषु
मेहरिमाणंरोपणाकासुदध्मसि॥अथोहारिद्रवेषुमेहरिमाणंनि
दध्मसि॥उद्गादयमादित्योविश्वेनसहसासह॥द्विषंतंमह्यंरंधयन् १५७
मोअहंद्विषतेरधं॥मित्ररविसूर्यभानुखगपूषहिरण्यगर्भ

मरीचिआदित्यसवित्रार्कभास्करायनमः॥एवंत्रिः नमस्कारानकृत्वा॥
सूर्याभिमुखस्तिष्ठन्॥अर्घ्यप्रदाननमस्कारानुष्ठानसिध्यर्थंमित्रो
जनान्यातयतिब्रुवाणोइतितृचवर्गस्यसूक्तस्यमित्रोदेवता॥प्रस्कण्वऋ
षिः॥श्रीसूर्यसावित्रीदेवताप्रत्यर्थेजपेविनियोगः॥ॐ मित्रोजना
न्यातयतिब्रुवाणोमित्रोदाधारपृथिवीमुतद्यां॥मित्रः कृष्टीरनिमि
षाभिचष्टेमित्रायहव्यंघृतवज्जुहोत॥प्रसमित्रमर्तोअस्तुप्रय
स्वान्यस्तआदित्यशिक्षति~~शिक्षति~~व्रतेन॥नहन्यतेनजीयतेत्वोतो

नैनमंहो॰ अश्नोत्यंतितोनदूरात्॥ अनमीवासइळयामदंतोमितज्ञ
१५८ वोवरिमन्नापृथिव्याः॥ आदित्यस्यव्रतमुपक्षियंतोवयंमित्रस्यसुम
स्याम॥ अयंमित्रोनमस्यःसुशेवोराजासुक्षत्रो॰ अजनिष्टवेधाः॥ त
स्यवयंसुमतौयज्ञियस्यापिभद्रेसौमनसेस्याम॥ महाँआदित्योनम
सोपसद्योयातयज्जनोगृणतेसुशेवः॥ तस्माएतत्पन्यतमायजुष्टम
ग्नौमित्रायहविराजुहोत॥१॥ मित्रस्यचर्षणीधृतोवोदेवस्यसानसि १५८
द्युम्नंचित्रश्रवस्तमं॥ अभियोमहिनादिवंमित्रोबभूवसप्रथाः॥ अभि

ॐ ह्रां ह्रीं अथोहारिद्रवेषुमेहरिमाणंनिदध्मसिहिरण्यगर्भमरीच
येनमः॥१६॥ ॐ ह्रूं ह्रैं उद्गादयमादित्योविश्वेनसहसासह॥ आदि
त्यसवितृभ्योनमः॥१७॥ ॐ ह्रौं ह्रः द्विषंतंमह्यंरंधयन्मोअहंद्विषतेर
धं॥ अर्कभास्करेभ्योनमः॥१८॥ ॐ ह्रां ह्रीं ह्रूं ह्रैं उद्यन्नद्यमित्रमहः
आरोहन्नुत्तरांदिवं॥ हृद्रोगंममसूर्यहरिमाणंचनाशय॥ मित्ररवि
सूर्यभानुभ्योनमः॥१९॥ ॐ ह्रौं ह्रः ह्रां ह्रीं शुकेषुमेहरिमाणंरो
पणाकासुदध्मसि॥ अथोहारिद्रवेषुमेहरिमाणंनिदध्मसिखगपू

सू०

१५१ धैर्यश्च महानार्घ्यः प्रजायते॥ महदर्घ्यैश्च तुर्वे ग्रामस्य धैर्यश्च जायते॥२४

रवरर्घ्यं नमस्कारं च दक्षिणमुद्राहतं॥ असानाग्रस्थ वामो हं न कुर्यान्नरकं

व्रजेत्॥२५॥ अरुणो माघमासे तु सूर्यो वैशाखे तथा॥ चैत्रे मासे तु वे

दांगो भानुर्वैश्राख तापनः॥२६॥ ज्येष्ठमासे तपेदिंद्र आषाढे तपते रवि

॥ गभस्तिश्रावणे मासे यमो भाद्रपदे तथा॥२७॥ ईषे हिरण्यरेताश्च

कार्तिके च दिवाकरे॥ मार्गशीर्षे तपेन्मित्र पौषे विष्णुः सनातनः॥२८॥ अ १५१

थ मुद्रालक्षणानि॥ हस्ताभ्यामंजलीकृतां नामिकामूलपर्वणः॥ अंगु

ष्ठौ निक्षिपेत्सेयं मुद्रा त्वाहिनी स्मृता॥२९॥ अधोमुखी त्वियं चेत्स्यात्स्थापि

नी मुद्रिका मता॥ उच्छितांगुष्ठमुष्टौ च संयोगात्संनिधापनी॥३०॥ अं

तः प्रवेशितांगुष्ठौ च सैव संरोधिनी मता॥ मुष्टिद्वयस्थितांगुष्ठौ संमुखं

च परस्परं॥३१॥ संश्लिष्टावुच्छ्रितौ कुर्यात्सेयं संमुखिका स्मृता॥ प्रस

तांगुलिकौ हस्तौ मिथः संश्लिष्टसंमुखी॥३२॥ कुर्यात्स्वहृदयं सेयं मु

द्रा प्रार्थनिका मता॥ जन्ममृत्युजराव्याधिसंसारभयनाशनः॥३३

हारिद्र्यव्यसनध्वंसी श्रीमान्पातु दिवाकरः॥ आत्मानं अर्चयेद्यस्य तद्दृ

भावयेत्सदा॥३४॥रविर्दाता रविर्भोक्ता रविः सर्वमिदं जगत्॥रविर्जपति
१६० सर्वत्र यो रविः सोहमेव हि॥३५॥इति साष्टांगं प्रणमेत्॥यस्य स्मृत्या च
नामोक्त्या तपः पूजाक्रियादिषु॥न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतं॥
अनेनार्घ्यप्रदानेन संस्कारानुष्ठानेन श्रीसूर्यसावित्र्यर्पणमस्तु॥
श्रीसांबसदाशिवाय ७ ॐ हौं ॐ जूंसः
भूर्भुवः स्वः त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं॥उर्वा
रुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् भूर्भुवः स्वः १६०
ॐ जूंसः हौं ॐ

अवोभिः पृथिवीं॥मित्राय पंच येमिरे जना अभिष्टिशवसे॥स देवान्वि
श्वान्बिभर्ति॥मित्रो देवेष्वायुषु जनाय वृक्तबर्हिषे॥इष इष्टव्रता अकः॥२॥
इति मित्रसूक्तं संपूर्णम्॥७॥एवं त्रिशोरागं त्रिदिनं क्षपयेत्॥षण्मासे कृ
तः पुरश्चरणं भवति॥ज्वरान्नाशयति॥शूलं नाशयति॥अथ मूलवा
क्यानि॥चतुर्विंशस्यर्घ्यदानैरेकमावर्तनं स्मृतं॥आवर्तनं चतुर्विंश
त्यर्घ्याणि च प्रकीर्तिताः॥२२॥चतुर्विंशत्यर्घ्याणि लक्षार्घ्यैकश्च जा
यते॥लघ्वर्घ्यैश्च चतुर्विंशैरर्घ्यमेकश्च जायते॥२३॥चतुर्विंशत्य

अथ गायत्रीभाष्यं लिख्यते। तदिति। सवितुः स्वप्रकाशस्य। वरेण्यं श्रेष्ठं। देवस्य। जगदुत्पत्तिस्थितिलयरूपक्रीडापरस्य परमात्मनः। भर्गः संसारभर्जनात् भर्गः। पुल्लिंगमविवक्षितं। न नूतनः प्रसिद्धं। वयमिति शेषः। धीमहि। ध्यायामः। ध्यानं कुर्मः। यः प्रसिद्धः भर्गः नः धियः बुद्धीः प्रचोदयात् प्रहृष्टतया प्रेरयतु। स्वश्रवणीकरोतु। आत्मविषयीकरोतु इच्छात। इति गायत्रीभाष्यं।